CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.P.B.

Coll. No. 469

Title Subodhini Tika

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 469 Subject: Grammar

Title: Subodhini Ṭīkā

Author: — Scribe: Jayakṛiṣṇa

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: (b) 10.3" by 4.6" (a) 9.8" by 5.6" Extent: 88 foll.

Language: Sanskrit Script: Devanāgarī

Remarks: ——

॥श्रीगणेशाय नमः॥ अनुदात्तं पदं परिभाषेयमिति। नाधिकारः। अस्वरितत्वात्। आद्युदात्तश्चस
थि२ मानो द्रेशार्पित ओ वाद्यात्त इत्यादीनामसंग्रहश्चस्यात्। परिभाषायां लिंगापेक्षायामाह स्वरवि
धीति। सूत्रे अनुदात्तशब्दः अर्श आद्यजंतः पदसामानाधिकरण्यात्। अत्रानुदात्तस्य क्रियमाणत्वा
त् तद्भिन्न उदात्तः स्वरितो वा वर्ज्यत इत्याह। नमिकमिति। यत्तदोर्नित्यसंबंधाद्यस्योदात्तः स्वरितवि
धानं तस्यैव वर्जनं। एकग्रहणं विधीयमानस्योपलक्षणं तेन नवैचांतश्च युगपदिति द्वयोर्वर्जनं।
इंद्राबृहस्पतीत्यत्र देवताद्वंद्वे चेति सूत्रेण पदद्वयस्यापि प्रकृतिस्वरे विधेयेत्र यागं वर्जनं। बृह
पूर्वपद आद्युदात्ते स्पतिशब्दो हि वनस्पत्यादित्वात् आद्युदात्त इति स्थितम्। गोपायतमिति। गुपइत्यस्य धातोरि
त्वं नोदात्तः। ततः आय प्रत्ययः। आद्युदात्तश्चेति प्रत्ययस्वरेण आद्युदात्तः। ततः सनाद्यंता इति धा
तु संज्ञायां धातोरिति यकार उदात्तः। स च प्रागुक्तयोरुदात्तयोः सतोः पश्चात्प्र[illegible]त्वात् शिष्टः तेत्वा
अतो बलवान्। तस्यानुदात्तौ सुप्पितावित्यनेनानुदात्तेन शप् बकारेण सह। अतो गुण इति पररूपे
कृते एकादेश उदात्तेनोदात्तः [illegible] इत्युदात्तः। थस लकारादेशः। तस्यनास्यनुदात्तेत्[illegible] उपदेशा नेदिदे
३ दित्यनेनार्धुपदेशात्परत्वात् [illegible] अनुदात्तत्वं। तस्य उदात्तात् [illegible] अनुदात्तस्येति स्वरितः। [illegible]
[illegible]। नन्वत्र तमिति स्वरितमाश्रित्यानुदात्तं पदमिति परिभाषया शेषनिघातः स्यादिति चेत्।
मैवं। यथोद्देशपक्षाश्रयणेनेयं परिभाषा त्रिपाद्यां न प्रवर्त्तते इत्यत्र ज्ञापकं तत्र तस्मिन्[illegible]यतोना

कारा

प्रक्रिया
व्याख्या शीका
सुबोधिनी
पत्राणि ब
पंचपंचा
शत् ५५
१

वइति च। सतिशिष्टेति। योहि यस्मिन्सति शिष्यते स तस्य बाधको भवतीत्यर्थः। एतच्च सति
शिष्टस्य बाधकत्वं न्यायसिद्धं। तथाहि। उदात्तस्वरितविधिनिरेकवाक्यतामापन्नयाऽनया
शेषनिघातः क्रियते तेनोत्सर्गस्यापवादस्य वा याचरमाप्राप्तिस्तत्रास्याः प्रवृत्त्या स्थाने पूर्वाप्रवृत्ति वै३
र्बाध्यते। तद्यथा। औपगवत्वमिति। अत्र एत्प्रत्यये त्वप्रत्यये च आद्युदात्तश्चेति प्रवर्त्तमानं स्व
स्यैव प्रथमप्रवृत्तिं बाधते द्वितीयप्रवृत्त्या तु स्वं परिनिष्ठापयतीति दिक्। ननु यदि सतिशिष्ट
लौ१ स्वरो बलीयस्तर्हि सतिशिष्टत्वाद्विकरणस्वरोऽपि बलीयान्स्यात्। तथा च गृह्णीत इत्यादिमध्योदा नं
त्तं पदं स्यात् अत आह। अन्यत्रेति। सतिशिष्टोऽपि विकरणस्वरः प्रत्ययस्वरं न बाधत इत्यर्थः। अत्र
च ज्ञापकं तासेः परस्य लसार्वधातुकस्याऽनुदात्तविधानम्। तथाहि। यद्यपि लावस्थायां तासिर्विधी स्या
यते तथापि लकारमात्रापेक्षत्वादंतरंगे घुचलादेशेषु कृतेषु पश्चात्तासिरिति तत्स्वरस्य सतिशि
ष्टत्वात् शेषनिघातेनैव सिद्धेरनर्थकं तत्स्यात्। गृह्णीत इति। अंतोदात्तं पदम्। अत्र तास्यनुदात्तेत्
सार्वधातुकनिघातो न। अदुपदेशोऽतित परकरणात्। आप्रत्ययस्यादंतत्वाभावात्। तिङ् तिङ इति
निघातस्तु न भवति। यदृत्तान्नित्यमिति निषेधात्। सहियवदितेऽपि प्रवर्त्तते। तवैवेति। तस आद्यु
दात्तश्चेति आद्युदात्तः स्वरः शिष्यत इत्यर्थः। देवीमिति। देवशब्दोऽत्र तृप्रत्ययांतत्वाच्चित इत्यंतोदात्तः। १
पचादिषु देवडितिपाठात् टिड्ढेति ङीप्। तस्यानुदात्तौ सुप्पिताविति अनुदात्तत्वे यस्येति चेत्यकारलोपः।

धाधादि
स्वरेणर
माद्यः

नन्वनुदात्तस्येति व्यर्थं न ह्यनुदात्ते स्वरिते वा परे उदात्तलोपोऽस्तीति। न च प्रसज्यत इति प्रासंगः
कर्मणि घञ्। कर्षात्वतो घञोंत उदात्त इत्यंतोदात्तत्वं। उपसर्गस्य घञ्यमनुष्ये बहुलमिति। उपसर्ग
स्य दीर्घः। तं वहतीति प्राग्घितादिति यत्। तित्स्वरितः। तस्मिन्परे यस्येति लोपः। अत्र स्वरिते परे उदात्त
लोपोऽस्त्येवेति वाच्यम्। स्वरिते हि विधीयमाने परिशिष्टमनुदात्तं पदमेकवर्जमिति अनुदात्ते परे तस्मिन्नुत्त
दात्तलोप इति चेन्न। सत्यां सौ हि धुक्षातामित्यत्र दुहेर्लुङि आत्मनेपदमानांशल इगुपधेति क्सः। आतामि
त्यस्य तास्यनुदात्तेदिदुपदेशादिति लसार्वधातुकानुदात्तत्वं। क्सः प्रत्ययस्वरेणोदात्तः क्सस्याचीत्यकार
लोपः। अत्र कर्षात्वतो घञोंत उदात्त इत्यत अंत इत्यधिकारादंतस्योदात्तत्वं स्यात् सति तस्मिन्नादेर्भ
वति। ननु यत्रोदात्तलोप इत्युच्यमाने कथमंत्यस्य प्रसंगः। नहि तदुदात्तलोपस्य निमित्तमिति चेन्न। तदि
आदेरपि न प्राप्नोति तस्याप्युदात्तलोपं प्रत्यनिमित्तत्वात्। क्सस्याचीत्यजादौ प्रत्यये विधानात् तस्माद
स्य प्रत्यय उदात्तलोपस्तत्संबंधिनोऽनुदात्तस्योदात्तो भवतीति सूत्रार्थस्ताधिकारादंतस्य प्रसंगः। य
दि तु निमित्तत्वानादरेण यत्रानुदात्ते परत उदात्तलोपस्तस्योदात्तो भवतीति सूत्रार्थस्तदाऽनुदात्तस्येति
न वक्तव्यं। अंत्यस्य प्रसंगाभावात्। न च सा हि धुक्षातामित्यत्र तिङ् तिङ इति निघातः स्यादिति वाच्यम्। हि
चेति निषेधात्। उदात्तनिवृत्तीति। कृदुत्तरस्य पदप्रकृतिस्वरेण उदात्तस्यां चत्यकारस्याचइति लोपेऽस्
ति अनुदात्तस्य चेति सूत्रेणोदात्तः प्राप्तस्तस्यायमपवाद इत्यर्थः। देवद्रीचीमिति। देवमंचतीति क्वि

...स्वर ...सुबोधिना

२ ३।२ तेविश्वग्देव्योरिति देवशब्दस्याद्रिआदेशः। उगितश्चेति ङीप्। अञ्चू च इति अंचेर्नकारलोपः। चाविति
दीर्घत्वं। अत्रीकार उदात्तः। ततः परस्य। उदात्तादनुदात्तस्य स्वरितः इति स्वरितत्वं। अतद्धित इति। चौ यः स्व
रः स तद्धिते परतो न भवतीत्यर्थः। अन्यथा दैवद्रीचीमित्यादौ यथोदात्तनिवृत्तिस्वरं बाधते तथा दाधीच इ
त्यादौ प्रत्ययस्वरमपि सतिशिष्टस्वरो बाधेत। तस्मादतद्धित इति वक्तव्यम्। अस्मिंश्च सति। उदात्तनिवृत्तिस्व
वा।३।५ रस्यायमपवाद इति फलितम्। दाधीच इति। दधीच आगत इत्यर्थे तेऽणस्वरे। उदात्तवत्तेऽच इत्यकारलो नी।१
पः। ततः सतिशिष्टत्वात् चाविति स्वरः प्राप्तो निषिध्यते। तथा चाण्प्रत्ययस्वरेणैव व्यवस्थांतरात्। प्रत्ययस्वर
एवात्रेति। आमंत्रितस्य च। इत्यादि। सामंत्रितमित्यनेनामंत्रितत्वं प्राप्तु षाष्ठस्येति। आमंत्रितस्य चेत्यस्य
इमम्म इति। मेशब्दात्परत्वमाश्रित्य गंगे इत्येषां त्रयाणामनुदात्तः। स च पदपाठे स्पष्ट एव। संहितायां
तु स्वरितात्संहितायामनुदात्तानामिति वक्ष्यमाणप्रचयापरपर्यायाएकश्रुतिः प्रवर्त्तते। अनुद्वीति। षाष्ठे
नामंत्रितस्य चेत्यनेनाद्युदात्तः। आमंत्रितं पूर्वं। अग्न इन्द्रेति। सर्वत्रैव षाष्ठेनाद्युदात्तानि। निघातो नेति।
आष्टमिकेन। नामंत्रिते। अत्रोत्तरसूत्रस्थं सामान्यवचनमत्र संबंधनीयमिति भाष्यं तद्याचष्टे। वि नी।४
शेष्यमिति। विशेष्यसमर्पकमित्यर्थः। क्वचित्तु नामंत्रिते समानाधिकरणे सामान्यवचनमिति पाठः।
स वृत्त्यनुरोधेनेति ज्ञेयम्। अग्ने तेजस्विन्नित्यादि। अग्ने इत्यस्याविद्यमानत्वात्तेजस्विन्नित्यस्यानंतरित २
स्य चाष्टमिकनिघातः। अग्ने इदे विसरस्वतीति। तैत्तिरीयके सहस्रतमीं प्रकृत्य इडे रंते दिते सरस्वति प्रि नमे...

(म ३१)

३।१ यिप्रेयसि मद्दिवि श्रुतीति एतानि तैत्तिरीये नामानि। हव्येतु इडे काव्ये विहव्ये इति पाठः स तु शाखांतरे
द्रष्टव्यः। समानाधिकरणग्रहणं पाणिनिमते अग्न इन्द्र वरुण इत्यादौ अधिकरणनिवृत्त्यर्थं भाष्यकृ
न्मते विस्पष्टार्थं सामान्यवचनापेक्षत्वात्तत्र सामानाधिकरण्यस्यार्थस्य संस्थितत्वात्। सामान्यव
चनमिति। पूर्वनिषेधस्यास्य विकल्पस्य च विषयविभागार्थं देवीः षडिति। अत्र देवीरित्यामंत्रितं विद्य
मानवत्। तेन षडित्यस्य निघातः। शरण्या इति। शरणं रक्षितृत्वं तत्र साधवः शरण्याः। तत्र साधुरिति
यत्। द्वितीयस्येति। षट्शब्दस्य शरण्यशब्दस्य चेत्यर्थः। सुबामंत्रिते। परस्यांगवदिति। तस्यैव परस्या
मंत्रितस्यांगवदेकदेशवद्भवति तद्ग्रहणेन गृह्यत इत्यर्थः। षष्ठ्यामंत्रित। अत्र षष्ठीशब्देन षष्ठ्यर्था
विभक्तिरुच्यते तेन नगोषु स्वामिन्नित्यत्रापि परांगवद्भावः सिध्यति। परेश्चनाहूर्ति। आडु परयोः स्व नि।५
३।५ निष्कृत्यांश्चेति कुप्रत्ययान्तोदात्तः। आमंत्रितान्तं प्रतियत्कारकमिति। यद्यपि आमंत्रितस्य द्रव्य च
नत्वान्नकारकापेक्षा तथापि आमंत्रितेयाधीना तु वाच्या क्रिया तस्याः तदपेक्षास्तीति तत्कारकमित्य
र्थः। पितर्मरुतामिति। अत्र मरुतामिति पदं पूर्वस्य पितरित्यस्यांगवद्भवति। पितरित्यामंत्रितस्य नि
घातेनानुदात्तत्वे ततः परं मरुतामित्येतदपि अनुदात्तमेव भवतीत्यर्थः। अव्ययानां नेति। तेन उच्चैरधी
यानेत्यत्रामंत्रितस्य चेत्याद्युदात्तत्वं न। न च निषेधवैयर्थ्यं। निपाता आद्युदात्ता इति आद्युदात्तत्वस्य।

२ निवारणादितिवाच्यम्। स्वरादिनोदात्तयोरुच्चैःनीचैःशब्दयोःपाठात्। अव्ययीभावस्यत्विति। अव्य
यीभावस्येति अव्ययीभावस्याऽव्ययसंज्ञासूत्रे लुङ्मुखस्वरोपचाराइति परिगणनादन्यत्राऽव्यय
संज्ञाभावेन अव्ययानां नेतिनिषेधोनप्रवर्त्ततइतिभावः। उपाधीयानेति। परांगवद्भावेना। मंत्रि
तस्येत्याद्युदात्तत्वम्। अभ्यभीति। अभिशब्दउपसर्गोभ्याभिवर्जमित्याद्युदात्तनिषेधात् फिट्स्वरेणांतो
दात्तः। तस्यनित्यवीप्सयोरितिद्वित्वं तस्यपरमाम्रेडितं। अनुदात्तंचेति परस्यानुदात्त
त्वम्। तस्मिन्नेवपरे इकारस्योदात्तस्ययणिकृते। उदात्तयणःपरत्वात् यकाराकारःस्वरितः। स्वल यकारस्य अकारः यकाराकौ
पू शब्दःकृदुत्तरपदप्रकृतिस्वरेणांतोदात्तः। तस्यओःसुपीतियण्। स उदात्तयण्। ततःपरोऽपिप्रत्ययः
पुत्वा सुस्वौ इदनुदात्तः तस्यानेनस्वरितः उदात्तयणोहल्पूर्वादित्युदात्तत्वंतुन। नोङ्धात्वोरितिनिषेधात्।
तस्यस्वरितेकारस्ययणि ततःपरस्य आशाशब्दाकारस्यानेनैवस्वरितः। आशाशब्दादि आशायाअ
दिगाख्याचेदित्यंतोदात्तत्वादनुदात्तादिः। अस्येति। आशाशब्दप्रथमाकारस्यानिकस्येत्यर्थः। शेषेति।
शाशब्दस्यनिघातोनेत्यर्थः। ननुयणादेशंप्रतिस्वरितस्यासिद्धत्वात्स्यानिन्येवयणःपरत्वः यथाऔ
ह्. उदिस्यत्र हृतशब्दे द्वित्वंप्रवर्त्तनेनतुछशब्दे। नचस्वरितयणःपरस्येत्यास्यणात्सिद्धत्वंशंक्यम्। तथा ३
सति। उदात्तादनुदात्तस्येत्यनेनयत्रक्रियतेतत्रापि असिद्धत्वंनस्यात्। नचेष्टापत्तिःतुल्यविरोधात्।

उदात्तयणइत्यनेनाऽभिनिर्हृतःस्वरितःतस्य
योयणस्ततःपरस्यानुदात्तस्यस्वरितःस्यादि
त्यर्थः।५

मं१

प्रत्यग्निरुपसर्गसाम असरस्य दित्यादौ स्वरितादर्शनात्। नचनोदात्तस्वरितोदयमितिनिषेधः
शंक्यः अनंतरस्येतिन्यायेनोदात्तादनुदात्तस्येतियत्रप्राप्तिस्तन्मात्रस्यनिषेधात्। अन्यथा स्व
घ्रा२ लव्याशान्याअग्निंपास्वोद्धा अस्मान्नित्यादावपिनिषेधापत्तेरितिचेत्। अत्राहुःअर्थकार्येऽस्ये
गविभागौकरिष्येते। उदात्तयणः। उदात्तयणःपरस्यानुदात्तस्यस्वरितयणो।
स्वरितोभवति। ततःस्वरितयणः। उदात्तयणइत्यनुवर्त्तते। उदात्ततरायणइत्यन्वयोऽभिनि
वृत्तःस्वरितःनयणःपरस्यानुदात्तस्यस्वरितःस्यादित्यर्थः। एवंचास्येवाश्रयात्सिद्धत्वंनास्याः। एक
स्या१ देशः। उदात्तयोरेवंनित्वे आंतरतम्यादेवसिद्धं। अन्यतरस्यानुदात्तत्वे स्वरितत्वेवा आंतरतम्या
त्स्वरितेप्राप्तेविधिरयमितिध्वनयन्नुदाहरणद्वयमाह। वोश्वाइत्यादि। बहुवचनस्यवस्नसावित्य
त्रानुदात्तंसर्वमपादादावित्यधिकारादस्अनुदात्तः। अशेःक्वन्निर्मुतिस्यादनादश्वशब्दः आद्यु
दात्तः। सोःरुत्वं। उत्वं। एङःपदांतादतीतिपूर्वरूपम्। क्वेति। किमोत्। क्वातीतिकिमःक्वादेशःतित्स्व
रितम्। अवरशब्दस्यांगशिटामदंतानामित्याद्युदात्तःतयोर्दीर्घ उदात्तः। वीरमित्यादि विशब्दो नि
पातत्वादाद्युदात्तः इदंशब्दः फिट्स्वरेणांतोदात्तः तयोरेकादेशःस्वरितः। दिविशब्देऊडिदंपदादीति
विभक्तिरुदात्ता। ईयते। ईङ्गतौ। दिं इतितिङ्तिङ इतिनिहितम्। अत्रैकादेशः। उदात्तः। इका

का॰ स्वर॰ टी॰
सुबोधिनी
४

रयोः स्वरित इति। ह्रस्वोकारयोरेवेत्यर्थः। दीर्घप्रवेशो लितिः। द्वितीयत इत्यत्र। उदात्त इति। एकादे
श उदात्त इत्यनेन। इयं च बह्वृचानां व्यवस्थोक्ता। अन्येषामपि तदीयप्रातिशाख्यानुसारेण ज्ञेया।
पूर्वरूपे इति। ते वदन्तीत्यादौ। ते इति तच्छब्दः फिट्स्वरेणांतोदात्तः। जसः सुप्त्वादनुदात्तो सुपि
तावित्यनुदात्तः। तयोरेकादेश उदात्तः। अवदन्निति वदेर्लङि प्रथमपुरुषबहुवचनम्। तेऽ
डुं ५ त्यतिङ्ङतात्परस्य तस्य तिङ्ङतिङ इति निघातः। सोयमिति। स इति तच्छब्दस्य प्रथमैकवचनम्। तच्
छब्दः फिट्स्वरेणांतोदात्तः। सु इति सुप्त्वादनुदात्तः। तस्य रुत्वे उत्वे गुणे च कृते एकादेशो नोकार
उदात्तः। अयमिति। इदमः प्रथमैकवचनं फिट्स्वरेणांतोदात्तं। तयोरेङः पदांतादतीति पूर्वरू
पे ओकारः स्वरितः। इकारयोश्च प्रश्लेष इति। ह्रस्वयोरिकारयोः सवर्णदीर्घे। ह्रस्वयोर्यत्र सवर्ण
स॰ ५ दीर्घः प्रश्लेष इत्युच्यते। उदात्तस्वरितस्थाने यो यण् स क्षैप्रसंधिः। यत्र एङः पदांतादतीति सोऽभि
निहितसंधिरुच्यते। तेषु स्वरितः स्वीक्रियत इत्यर्थः। वीदं ज्योतिः। अप्स्वभिहितेऽवदन्निति क्रमेणो
दाहरणानि। उदात्तादनुदात्तस्य। अत्र तयोर्य्वावचीत्यतः संहितायामित्यनुवर्त्तते तेन प
दकालेऽनुदात्तमेव। अग्निमीळे इति। अग्निशब्दः फिट्स्वरेण प्रत्ययस्वरेण वांतोदात्तः। अम् सुप्त्वादनु
दात्तः। अमि पूर्व इति एकादेश उदात्तः। ईळे इति तु ईड स्तुतौ लटि उत्तमपुरुषैकवचनं। द्वयोश्चास्य स्वर

उदात्तस्वरितस्थाने यो यण् स क्षैप्रसंधिः। यत्र एङः पदांतादतीति सोऽभिनिहितसंधिरुच्यते। तेषु
स्वरितः स्वीक्रियत इत्यर्थः। वीदं ज्योतिः। अप्स्वभिहितेऽवदन्निति क्रमेणोदाहरणानि। उ
दात्तादनुदात्तस्य। अत्र तयोर्य्वावचीत्यतः संहितायामित्यनुवर्त्तते तेन पदकालेऽनुदात्त
मेव। अग्निमीळे इति। अग्निशब्दः फिट्स्वरेण प्रत्ययस्वरेण वांतोदात्तः। अम् सुप्त्वादनुदात्तः।
अमि पूर्व इति एकादेश उदात्तः। ईळे इति तु ईड स्तुतौ लटि। उत्तमपुरुषैकवचनं। द्वयोश्चा
स्य स्वरयोर्मध्यमेत्य संपद्यते स डकारो ळकार इति वक्ष्यमाणेन प्रातिशाख्येन। इत्यस्य ळः
डुं ५ तिङ्ङतिङ इति निघाते ईकारस्य स्वरितः। न च मकारेण व्यवधानम्। स्वरविधौ व्यंजनम
विद्यमानवदिति परिभाषणात्। एवं सर्वत्र ज्ञेयं। ननु तित्स्वरितमित्यस्यानंतरमिदं वक्तव्य
म्। एवं च स्वरितग्रहणं न कर्त्तव्यं भवतीत्याशंक्याह। अस्येति। यदि तत्र क्रियेत तर्ह्यनुदात्तं न८
पदमेकवर्जमित्येतदनुवर्त्तेत। इह तु प्रकरणे न प्रवर्त्तते स्वरितस्यासिद्धत्वात्। तेन द्वयोर
प्युदात्तस्वरितयोः श्रवणं सिद्धं। तमीशानास इति। तमिति तच्छब्दस्य द्वितीयैकवचनमंतोदा

त मू। ईशानशब्दस्य ऊसि आङसेरस्तु इत्यसुगागमे कृते रूपम्। ईश ऐश्वर्ये अस्मात् शान
च्। चित्त्वादन्तोदात्तः। ञसः सुप्त्वात् अनुदात्तत्वं। ईकारस्य सकारांशस्य च स्वरितत्वं नोदात्त
३२ उदात्तस्वरितोदयौ यौ परौ यदि स्मो ति बहुव्रीहिः॥ उदयशब्दः परशब्देन समानार्थः आतिशा
ख्येषु प्रसिद्धः। आद्यर्थे परशब्दप्रयोगे मंगलार्थमुदयशब्दः प्रयुक्तः तथा च भाष्यं। मंग
लादीनि मंगलमध्यानि मंगलान्तानि हि शास्त्राणि प्रथन्ते वीरपुरुषाणि भवन्त्यायुष्मत्पुरु
षाणि च॥ इह आदौ ईशशब्दो मध्ये शिवशब्दः शिव शमरिष्टस्य करे इति अन्ते चोदयश
ब्द इति पाणिनीये मंगलं कृतम्। प्रथ आरुरिति ये इति यच्छब्दस्य प्रथमाबहुवचनं फिट्स्वरेणा
न्तोदात्तम्। आरुरिति अर्तेर्लिटि प्रथमपुरुषबहुवचनं तस्य परस्मैपदानामिति सूत्रप्रत्य फि॰१४
यस्वरेणान्तोदात्तः॥ न च तिङ्ङतिङ इति निघातः शंक्यः॥ यद्वृत्तान्नित्यमिति निषेधात्। आकार
स्य तु उदात्तस्वरितपरस्येति वक्ष्यमाणेन सन्नतरादेशः॥ वो ... केति॥ अनोपि विसाकारस्य ५
सन्नतरः। केति किमोत्। तिस्वरितम्। एकश्रुति। संबोधनं संबुद्धिरित्यनेनान्वर्थस्य संबुद्धि

शब्दस्य ग्रहणं। न एकवचनं संबुद्धिरिति पारिभाषिकस्य। सति तु तस्य ग्रहणे आगच्छ तदेवाब्रा
ह्मण इत्यत्र न स्यात्। तदाह। दूरात्संबोधने इति। अन्वर्थग्रहणं च दूरादित्यनेन संबंधा
ल्लभ्यते न त्वामंत्रितविभक्तेः दूरत्वमदूरत्वं च संभवति संबोधनस्य तु क्रियारूपत्वात् दूरा दा
न्नत्वाशब्दादि विशेषणसंभवः। दूरत्वं च न देशस्वरूपमाश्रीयते। अनवस्थितत्वात्। किं
तर्हि संबोधनक्रियापेक्षया दूरत्वं। यावति देशे प्रकृतिप्रयत्नोच्चरितं संबोध्यमानेन न श्रू
यते। किंतु अधिकं प्रयत्नमपेक्षते तेन तत्संबुद्धौ दूरं भवति। एकश्रुतिरिति। उदात्तादीनां स्वराणां एम
अविभागेनावस्थानमेकश्रुतिः॥ आगच्छेत्यादि। दूराद्धूते चेति। वाक्यस्य टेः प्लुत उदात्तः। प्रत्यु
दाहरणे त्रैस्वर्यमेव भवति। तथा ह्युपसर्गाश्चाभिवर्जमित्युदात्तः। गच्छेति तिङन्तस्य निघा प्लु४
तः भो इत्यत्र निपाता आद्युदात्ता इत्याद्युदात्तः। शेषस्यामंत्रितनिघातः। यज्ञकर्मणीति येन वे
दमंत्राः पठ्यन्ते तेषां यज्ञक्रियायामपि तथैव प्रयोगे प्राप्ते एकश्रुतिर्विधीयते। मंत्र इति। एतच्च
जपेति पर्युदासाल्लभ्यते तेनो हादिषु न। अतएव अप्रयोगे प्राप्ते एकं हे इन्द्रा चुं वर्धस्वेति

समासांतोदात्तत्वे कर्त्तव्ये आद्युदात्तं प्रयुक्तमिति प्रसिद्धिः। जपादीनां च। जपन्नूरंखसाम्रा
नीत्यर्थः। अग्निर्मूर्द्धेति। अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्या अयं। अपां रेतांसि जिन्वतो।।
अंगेर्निर्न लोपश्चेत्यग्निशब्दः प्रत्ययस्वरेणांतोदात्तः। मुर्वी बंधने। कनिन्युवृषितक्षीत्तु
द्वे४ वर्त्तमाने पृषच्चुस्तान्तूपन्नित्यत्र मूर्द्धन्शब्दः कनिन्प्रत्ययांतो दात्तो निपातितः। दिवशब्दात् नो४
परस्य षष्ठ्येकवचनस्य। ऊडिदंपदाद्युदात्तत्वम्। ककुद्शब्दः प्रातिपदिकस्वरेणांतोदात्तः।
पातेर्डतिः पतिशब्दः प्रत्ययस्वरेणाद्युदात्तः।। पृथिव्याः षिवन्संप्रसारणं च। षित्वान्ङीष्। ङीष्
षष्ठ्येकवचनस्योदात्तयणो हल्पूर्वादित्युदात्तत्वम्। इदम्शब्दः प्रातिपदिकस्वरेणांतोदात्तः।
मि४ आप्नोतेः क्विप् ह्रस्वश्च ऊडिदमिति विभक्तेरुदात्तत्वम्। रीङ् स्रवतिभ्यां तुट्चेत्यसुन्प्रत्ययः।
नित्स्वरेणाद्युदात्तो रेतःशब्दः। जिन्वतीति जिन्वतेः प्रीणनार्थस्य तिपि तिङ्ङतिङ इति निघातः।
येत्यप्र वर्त्तते आदेशैः सुन्प्रत्ययांतः। विपूर्वात्क्रूयतेः क्तः संप्रसारणं च प्रत्ययेत्यादि सूत्रेणांतोदात्त ६
त्वम्। उ बैकाराम्। वषट्शब्देनात्र वौषट्शब्दोपि गृह्यते। समानार्थत्वात्। द्वावपि हितौ देव
प्रणव ष्टेः इति प्रयोगकाले प्रणवः। ममेत्यादि। युष्मदस्मदोर्ङसीत्याद्युदात्तत्वम्। अग्नेः शब्दस्यामंत्रितनिघातः। ५

नासंप्रदानकस्य दानस्य द्योतकौ। नन्वेवं प्रतिपत्तिलाघवार्थं वौषट्शब्द एव कुतो नोक्त
इति चेन्न। विचित्रा हि सूत्रस्य कृतिः पाणिनेः। क्वचिद् अक्षरलाघवमाश्रीयते क्वचित्प्रतिपत्ति निर
~~लाघवमाश्रीयते क्वचित्प्रतिपत्ति~~लाघवमिति।। ननु वषट्कार इत्यत्र कारप्रत्ययो न स्यात्
वर्णनिर्देशे हि स विहित इति चेन्सत्यम्। एतदेव ज्ञापयति समुदायादपि कारप्रत्ययो भव
तीति। तेन एवकार इत्यादि सिद्धं। उच्चैःशब्दोऽधिकरणप्रधानोपि तद्विशिष्टवचन क्रिया
यां वर्त्तते। तेन क्रियाप्रकर्षादामुप्रत्ययः। उदात्ततरो भवतीति फलितार्थः। ब्रूहि प्रेष्येति सूत्रे
ण वौषट्शब्दस्यादेः प्लुतउदात्तो विहितः तदपेक्षयायमुदात्ततरोस्य विधीयते। अन्ये
तु स्वार्थिकस्तरबित्याहुः। विभाषा वा ग्रहणे वर्त्तमाने विभाषाग्रहणमछंदसीति पदच्छेदेन
तंत्रादिना भाषायामपि विधानार्थं। अत एव श्वेतो धावति। अलंबुसानां यातेति अर्थवाक्यमि
ति पस्पशाने भाष्यं। तत्र श्वेतिप्रातिपदिकस्वरेणांतोदात्तं। इतः इति इदम्शब्दात्तसिल्।
उडिदमित्यनेनोदात्तः। श्वेते वर्णाणां न ... दिकस्वरेणांतोदात्तः। अलंबुसशब्दः
स्याद्यु दात्ते प्राप्ते घृतादित्वादंतोदात्तत्वम्। अलंशब्दो निपातत्वादाद्युदात्तः। बुसशब्दः प्रातिप१

प्राप्ते: श्वेते प्रान्तवर्ति स्वरसमीपे भवः श्रौत्यः तस्य श्रौत्य स्या

बंधं निगद्यते निगदः२

फिट्सूत्रस्वरेणांतोदात्तः। तत्र भाषायां च एक श्रुतिर्नस्यात्। तद्धि स्वरत्वे देकधर्मेकवाक्यं धर्मस्यात्। न सुब्रह्मण्याख्ये निगदे इति। अपादबंधं गदितं यागधर्मिणि। निःशब्दः प्रकर्षे उच्चैरपाद बंधं यजुरात्मकं यन्मंत्रवा संपद्यते स निगदः। नितरांगद्यत इति कर्मणि नौ गदेत्यप्। तस्य च सुब्रह्मण्याशब्दोपलक्षितत्वात् सुब्रह्मण्या शब्दः परित्यक्त स्त्रीलिंग एव निगद विशेषस्य नाम। सुब्रह्मण्योमिति। तत्र साधु रित्यित्। तिस्वरितं। यतो नावदतितु न। तत्र उच्चरत्यनुवृत्तेः। पासदृश एकादेशः स्यानेंतर तम इति स्वरितः। ततो निपातत्वाद्युदात्तेन ओमशब्देन ओमाङोश्चेत्युदात्तस्वरितयोरेका देशः स्वरित एवेति हरदत्तादयः। असाविति। प्रथमांतस्योपलक्षणं। तदाह। प्रथमांतस्येति गार्ग्य इति। गर्गादिभ्यो यञ्। अमुष्येति। षष्ठ्यंतस्योपलक्षणम्। दाक्षेरिति। दक्षस्यापत्ये अत इञ्। अत्रापि निस्वरः प्राप्तः। स्यांतस्येति। स्येति रूपं विवक्षितं। पूर्ववत्तिकारं भातस्य शब्दांतस्योपोत्तममंत्स्यश्चो नयमुदात्तं भवति। देवब्रह्माणः। सुब्रह्मण्यायामेव देवा ब्रह्माण

दृ१ यद्यो१

अन्येषां मते ऊ ऊ० ग॰ तः। ४ प्राय॰।

य पक्षे तु सामानाधिकरण्यं। तद्भावि भावितं विशेषवचने इति पूर्वस्य पक्षे विद्यमानत्वात् दात्परत्वात् तु सा आगच्छ इत्यस्य निर्घातो भवति। अग्नि मह्ले देवशदे देवशास्येवा तेनानुदात्तत्वं विधि ध॰४

इति प्राप्ते। तत्र पूर्वेणास्वरितस्योदात्तत्वे प्राप्ते। नेनानुदात्तो विधीयते। देवाब्रह्माण इति। देवब्रह्मणो वैयधिकरण्येद्वयोरप्याद्युदात्तत्वं। ततः परस्यानुदात्तस्य स्वरितः तस्मान्नेनानुदात्तः। आमंत्रितस्य तरस्य न पूर्वामंत्रितं विद्यमानत्वेन पदात्परत्वाभावा त्ब्रह्मग्रहणं तु न कर्त्तव्यं। स्वरि। अनुदात्तानामिति जातौ बहुवचनं तेनैकस्य द्वयो र्बहूनां च भवति। एकस्य भवति। द्वयोः अग्निमीळे पुरोहितं। बहूनां तु मत्वेए वदर्शितम्। इमं मे इति। इदमशब्दः प्रातिपदिकस्वरेणांतोदात्तः। विभक्तिरनुदात्ता न्यदा घत्वे। मि पूर्वः। एकादेश उदात्तेनोदात्तः। मे इत्यनुदात्तं। अनुदात्तं सर्वमपादादौ विधिकारा तृतस्य उदात्तादनु दात्तस्य स्वरितः तस्मात्परेषां गंगे यमुने तिमेकश्रुतिः। सर्व एते आमंत्रितनिघातानुदात्ताः। ननु मे इत्यस्य स्वरितस्य विधायकं त्रिपादीस्थत्वादसिद्धं स्यात्। न च स्वरितादित्याश्रया त्सिद्धत्वं। कथं सुषेत्यादौ चरितार्थत्वात् इति वैश्य। तस्मादि तद्भाराश्च न वस्त्रमाः स्वस्वाना उल्लंघ्य शास्त्रांतेना प्यवार्त्तिकयोर्निर्वाता। नसुब्रह्मण्यायामिति सूत्रे स्वरि

प्रायः अग्निमे दे होतारं रत्नधातमम् इत्यत्र स्वरितानुदात्त शब्दात्परयो द्वयोरेक श्रुतिः। ५

तस्य दात्तइति चरमाणवक्कांडोत्कर्षस्य ज्ञापितत्वाच्च। नचसुआत्तएणोमिति सिद्धः स्वरितेत्स्ती
तिवाच्यं। तत्र एकादेश उदात्तेनोदात्त इतिसूत्रस्य वैयर्थ्यापत्तेरावश्यकत्वात्। तत्रैवानुदात्तग्रहणं नानुवर्त्त
ते। उदात्तसत्त्वशब्देन नीचैरर्थ उच्यते ते नत्वनुदात्तत्वं लक्ष्यत इत्याह। अनुदात्ततर इति। स
स्था४ कर्षस्त्वनुदात्तापेक्षः। सरस्वतीत्यादि। अत्र मेशब्दः ... सरस्वतीत्यस्यामंत्रितनिघा
तः। अनुदिशब्दस्य तु न। पादादित्वात्। आमंत्रितस्येति। षाष्ठेन अनुदीन्यस्योदात्तं प्रथमस्वरे
तस्मिन्परे पूर्वस्य सरस्वतीकारस्य सन्नतरः। व्यचव्यक्ष्यस्व इति। वीति। उपसर्गत्वाद्युदात्तः।
ततः परस्याच्च क्षय दिति तिङन्तस्य नि तिङ्ङतिङ इति निघातः। स्वरितेति। उः स्वरो स्वरितावितिस्व
रितः। तस्मिन्परे यकारांकारस्य सन्नतरः। साधारणमयाइति। एकस्मिन्पदे पदद्वयेपि च प्रवर्त्त
नात् साधारणं॥ श्रीः। प्रकृतिर्द्विविधा धातुः प्रातिपदिकं च। तत्र धातुस्वरमाह। धातोरिति। कर्षी
~~...~~ अनुदात्तत्वे उदात्तादनुदात्तस्येति स्वरितः। बहुवचनस्य वस्से ८
सादिति नसादेशस्य स्वरिता संहितायामिति प्रचयापरपर्याय एकश्रुतिः। असीति। असे
स्ते
आद्युदात्तश्चेत्यादिर्नित्यमित्याद्य यत्कएकस्मिन्नेवपदे प्रवर्त्तनान्नसाधारणः॥२

स्मिपिता सस्त्वोरिति सलोपः। अकारस्योदात्तत्वम्। ततः परस्य स्वरितत्वं सस्मशब्दे सकाराका
रस्य उदात्तस्वरितपरस्येति सन्नतरादेशः। स्वपादिनास्य तुदात्तेन्त तः लसार्वधातुकमि
त्यनुवर्त्तते तदच्युनिटीति संबंधादिह समग्रं तं संपद्यते नेत्याह। अनिट्यजादावित्यादि।
रुदादि गणपर्यन्ताः ४ अजाद्यंतर्गणइति। आगणांतात् इति भावः। दिंसिंनीतिहिंसिहिंसायां रुधादिः। श्नान्नलोपः।
श्नसोरल्लोपः ~~...~~ र ह्लोपः। क्ङितिचेति गुण न इति। इ
त्यनुरोधादेतदुक्तं। भाष्ये तु प्रायेणेदं न दृश्यते। एवं च हिनसानीत्यत्राद्युदात्तत्वमपि पक्षे भवति।
यदि तु आद्युदात्तत्वं पक्षे नेष्यते तर्हि व्यवस्थितविभाषाश्रयणं। केचित्तु स्वपानीत्यत्रैतदभा
वे धातुस्वरेणाद्युदात्तत्वमेवेति विशेषाभावादयं विधिर्न प्रवर्त्तते नेतशा ह चर्या हिनसानीत्यत्रा
~~...~~ प्ययं न प्रवर्त्तत इति वृत्तिकार
२ शयं कथयंति। हिनसानीति। अत्र श्नम् स्तन्मध्यपतितस्तद्ग्रहणेन गृह्यत इति न्यायात् धातुग्र
हणेन नकाराकार उदात्तः। ततः परस्य स्वरितत्वम्। अनिटीति किं। स्वपितः। रुदादिभ्यः सार्वधातु

४ ~~अस्य~~ ऋ इतीट्। अभ्यस्तानाम्। आदिः सितो न्यतरस्यामित्यतः आदिरिति वर्त्तमाने पुनरादि
ग्रहणं नित्यार्थं। अन्यथा आदिग्रहणसंबद्धमन्यतरस्यांग्रहणमनुवर्त्तेत। अपि किं स्यात्। अत्र
ऊ॰।२ निटि किं। जक्षिथ। येऽदतीति। उदाहरणं। [illegible] तस्यां दभ्यस्तादित्यदादेशः। अभ्यस्तयोरित्या
लोपः। विस्वरमिति। चितइत्यनेन विहितमंतोदात्तस्वरमित्यर्थः। दधानेति। लटः शानजादे
शः। अनुदात्ते च। न विद्यते अदात्तो यस्मिंस्तिनिषकु व्रीहिस्तदाह। अविद्यमानेत्यादि। अन्य
दे॰६ था हि शास्त्रीये अनुदात्ते गृह्यमाणे मादिस्मदद्दित्यत्र नित्वादंतरंगत्वाद्धाकारलोपकृतेऽत्रा
द्युदात्तस्यापवादोयम्। अत्र मदिर्दिवादिः। दरिद्रा जागृ यौ वदादी। अन्येषु नुजुहोत्यादयः। गौ॰रा॰
धौतरूपाणि [illegible] उदाहरणानि। बिभेति। जिह्रेति। बिभर्त्ति। [illegible] आमिदित्यभ्यासस्येत्वम्। ममत्त्विति। मदे
४ धु॰।२ र्लोट्। बहुलं छंदसीति शपः श्लुः। जज्ञनत्। दधनदिति। जनजनने धन धान्ये आभ्यां लेट् तिप् इतश्चलो
प इतीकारलोपः। लेटोडाटावित्यट्। दरिद्राति। जागर्त्ति। पिपर्त्ति किं। दरिद्रतिः अत्र परत्वादाकारलोपे
कृते इकारस्योदात्तत्वं माभूत्। ननु पूर्वग्रहणं व्यर्थं। प्रत्ययेऽपि तीत्येवोक्तेनस्मिन्निति निर्दिष्टे पूर्व ९

४

स्येति पूर्वस्यैव भविष्यति। न च पितः पूर्वमेव कार्यं भाग्यथा स्यात् पिदंतम् आभ्य दित्येवमर्थं त स्वरेभ्वाः सो वर्यः॥२
दिति वाच्यम्॥ ॥ कथं पुनः सप्तमीनिर्देशेन दंतस्य प्रसंगः। एनदेवज्ञापयति। सौवर्यः सप्त
म्यस्तदंतस्य सप्तम्यइति। तेनोपोत्तमं ~~कथं पुन सप्तमी निर्देशेन दंतस्य प्रसंगः एतदेव~~ ति
तिङ्ति रित्यस्य याने। उपोत्तममुदात्तं भवति। चघ्न्यतरस्यां। चङंतस्य त्रयो न लुरिति पर नद्यू॰ऊ॰
पर त इति। नन्वेवं चतुरः शासीत्यत्रापि शासंतस्य प्राप्नोति। शासग्रहणसामर्थ्यान्न भविष्यति। यदि हि च
तुरः शासीत्यनेन शासः प्रत्ययत्वमिष्टं स्यात्तर्हि तनः। उडिदंपदादित्यस्यानंतरं चतुरश्चेत्येव ब्रूयात्तत्र
सर्वनामस्थानग्रहणमनुवर्त्तमानं [illegible] चतुर्भ्योरुडादिरिति रुडादेरुदात्तविधानात् शस एव भवि
ष्यति। लितिपूर्वस्य त्वाग्रहणात् पूर्वमिति वर्त्तते। न दाहु। प्रत्ययात्पूर्वमिति। तेन स्वरविधौ सम्यास्तदंतस्य वि॰४
ज्ञापनाल्लिदंतस्य स्वरो नाशंकनीयः। चिकीर्षक इति। चिकीर्षतीति सन्नंतान्ण्वुल्। तस्यां कादेशः
२ ककारस्य ईकारः क कारेकारः। सनोऽतोलोपः। ककारेकारउच्चारणार्थः। न चाद्योपस्य स्यानिवत्वम्। स्वरविधौ तन्निषेधात्। क्वचि
त्सुकके गौरिकविधौ [illegible] एषु कारितकमिति दृश्यते तत्र गौरिकाद्येषु कार्यादि [illegible] नकसावि तिवि

१० षष्ठ्योदेशा इत्यस्मिन्नर्थे यथाक्रमं गौरिकशाद्यादेषु कारिशं ... विषयत्वनक्तौ ज्ञेयौ। आदि
र्णमुच्चि। अस्य स्थानामिति। यद्यपि ज्ञो ऽन्त्यं ज्ञो ऽन्त्यमिति प्रतीकमुपादाय एकाज्ञुधातुषु मितस्वर
स्यास्य च विशेषाभावादनेकाज्ञुदात्तेन इति दरदन्त ग्रंथो ऽयस्तीति निवृत्तमिति प्रतीयते तथा
पि आर्थिकार्थकथनपरतया नेयम्। त्यमुत्रिपरे नि। यद्यपि सोवर्णस्य श्रम्य इत्यत्नीड्ा ति सूत्रे
व्यवस्थापितत्वात् एलमुत्नं नस्यात् दिरुदात्तो भवतीति सूत्रार्थेन भाव्यं। तथापि फले विशेषाभा
वादेवमुक्तमिति प्रतिभाति। ज्ञो ऽन्त्यं ज्ञो ऽन्त्यमिति। यडंतात् ल्मत्रुन्त्रनित्त्य बीक्षयोरिति द्वित्वं।
अत्र प्रथमः। ओ ऽन्त्युदात्तः। द्वितीयः स्वरितः। ततश्चत्वारः प्रचयाः। अत्र। इत्यकीर्यत इत्या
द्यो इत्वे परत्वे च सतीति अयं स्वरं दृष्टस्तान्निर्वाहार्थं तास्यनुदात्तेति सूत्रे समासेकदेशोपुप
पदेश शब्द इहानुवर्त्यते स ... विषया ऽनेन लदिजायते स्वयमेवेत्यत्रैव स्वरोन स्यात्।
ये विभाषेत्यावेमति। ... नरकालेऽयं तत्वेपि। उपदेशे ऽनजंतत्वादिति। नैमेवम्। येइति वि १०
षष्ठ्यसप्तमीमाश्रित्य प्रत्ययोत्पत्तेः प्रागेवात्वप्रवृत्तेरित्याहुः। कर्तव्ये इति। कर्तवाचि निस्सार्वधा
म्याय विपरिणम्यते। तदाह। उपदेशे ऽजंतानामिति। नन्वेवं एकं द्वादशधा जज्ञे इत्यादावित्वो ऽनन्त एवर्था क्तिमकर्त्रे

के विदितो योयकृत्तस्मिन्नुस्मयतेइति। आदिमध्यौ पर्यायेणोदात्तौ। तास्यनुदात्तेति नेदत्यस्यानुदा
त्तत्वम्। उपोत्तमं रिति। त्यन्तः। उपोत्तममितिवर्त्तते। तदाह। उपोत्तममिति। ... नामंत्यमुत्त त्यादीर
मं तस्य समीपमुपोत्तमम्। माहिचीकरतमिति। अउपदेशात्वरत्वेनेसार्वधातुकानुदात्तत्वे
कृते चङ्‌ एवस्वरे प्राप्ते पक्षे धात्वकार उदात्तः। उपोत्तमयरुणानुदायात्स्याद्यो नैमाहिदधत
त्योरि ति ५ अत्र विभाषा धेट् ... चङ्। इति धातुस्वराः। अथ प्रातिपदिकस्वराः। कर्षात्वतः। ... त्नित्या ५
दिर्नित्स्यापवादः। आदस्यास्तीति आत्वान्। तसोमत्वर्थ इति भात्वा ऊत्वाभावः। कृष्व आत्वांवे
तिस्माहारद्वं द्वः कर्ष इति शावंतस्यानुकरणं। नघञंतस्य। तदाह। शपानिर्देशादिति। पाक इति। पये
घञ्। चजोरिति कुत्वम्। कालविशेषे इति। कृतक्षापराधे। तक्षशब्द इति। तक्ष अदने। चुरादिः।
अनित्यण्यंताश्चुरादय इति ... नास्ति तदा घञ्। एयंतानुएरच्च इत्यपि सिद्धम्। एरजेण्यं ... ता
नामिति तुनास्तीत्याहुः। उत्तमशश्वत्तमाविति। तमबंतावेतौ तेन द्रव्यप्रकर्षविवक्षायामभावः। वद्दौ२
पित्वादनुदात्तत्वे प्राप्ते पाठः। चतुरः। चतेरुरन्। नित्वादाद्युदात्तत्वे प्राप्ते ऽन्तोदात्तार्थमिरम्। अनु
चतस्रः पद्मपेत्यत्र चतस्रशास्त्र इति स्थिते परत्वात् त्रिरस्रन इति रेफादेशे नकाराकारस्योदात्तत्वं प्रा

[illegible] १३

न्नोति। अत आत्। अचिरइति। स्थानिवत्त्वादिति। नु च स्वरविधौ स्थानिवत्त्वनिषेधः स्वरदीर्घयलोपेषु लो
पाजादेशएव न स्थानिवत् इति नियमात्। अस्युपोत्तममिति। षट्त्रिचतुर्भ्यो हलादिरित्यस्यापवादः।
पंचभिरित्यादि। पंचनवसप्तदशशब्दाः कनिन्प्रत्ययान्ताः। आपङ्क्तिरिति। षष्शब्दः फिषूस्वरेणांतोदा
त्तः। तरन्तेर्ड्रिः। अयमपि फिषूस्वरेण प्रत्ययस्वरेण वांतोदात्तः। न त्वत्रापि षट्त्रिचतुर्भ्यो हलादि
तिविभक्तेरुदात्तत्वं। न वा नामिति। अत्रापि विभक्तिरुदात्ता विभाषा। उक्तविषये तिस्रः। षट्त्रिचतु
र्भ्यः पराया भक्तादिर्विभक्तिस्तदंतस्योपोत्तमं वा भाष्यामुदात्तं वा स्यात्। पंचभिः सप्तभिः॥ तिस्रभिः॥
५रिति२ चतुर्भिः पञ्चषट्कचतुर्भ्यो हलादिरित्यंतोदात्तानि। सर्वस्य। सर्वशब्दस्तु छादिषु अंतोदात्तो निपातितः।
सर्वस्य विकारः सार्वइत्यत्र आनुदात्तादेरञ् इति अनुदात्तलक्षणेऽञ्यथा स्यात्। अवर्णं तु सर्व
त्राद्युदात्तस्यैव प्रत्ययलक्षणेनापि सर्वस्वरस्येष्यमाणत्वात्। क्नित्यादि। नीझीति सूत्रे पूर्वग्रहणे
न सौ वर्यः सन्नम्यस्तदंतसप्तम्यंइति। ज्ञापितत्वात् तदंतसप्तमीयमित्याह। जिरंतस्येति। पथि
मथोः। गमेरिति। परमेकित्। मंथः। पतस्य चेति निप्रत्ययांतावेनावंतोदात्तौ मं थपः कित्वादुप
धालोपः पन्थाइति। पथिमथ्यर्तुहामात् थोन्यः। पथइति। नस्यटेर्लोपः। उदात्तनिवृत्तिस्वरेणेति। ११

अनुदात्तस्य च यत्रोदात्तलोपइति विभक्तिरुदात्ता। दावदात इति। ददां तेः कृत्यार्थे तवै केन्के
न्यत्वन इति तवै प्रत्ययः। ऐकारस्यायादेशः। लोपः शाकल्यस्येति यलोपः युगपद्रूणं पर्या
यनिवृत्त्यर्थं। अन्यथा एकवर्जमिति वचनाद्यौगपद्यं न स्यात्। क्षयो निवासे। निवासेऽभिधे
ये क्षयशब्दः वनि कृत्स्वर्थे आद्युदात्तः। स्वेक्षयेइति। क्षि निवासगत्योः। क्षयंति निवसंति यस्मिन्नित्य
धिकरणे पुंसि संज्ञायामिति घः। निवासे किं। व्याधेः क्षयः। क्षि क्षये। एरच्। कर्त्तरि षष्ठी। जय।
जयोऽश्वइति। पुंसीति करणे घः। करणे किं। जयो ब्राह्मणानां भावे एरच्। वृषादीनां। वृषु सेचने इगु
पधलक्षणः कः। वाजेनिरिति। वजेर्घञ्। कर्षात्वत इत्यंतोदात्ते प्राप्ते वृषादेराकृतिगणत्वादाद्यु
दात्तः। संज्ञायाम्। चंचेति। उपमानशब्दोऽयमुपमेयस्य संज्ञा। कनो लुम्बिनिइवेप्रति कृतावित्ति
५४ कनो लुम्मनुष्यइति लुप्। ननु प्रत्ययलक्षणेन नित्त्वान्नित्यादिर्नित्यमित्येव सिद्धम तआ
ह। एतदेवेति। निष्ठा। दत्तइति। ददातेः क्तः। दोदद्घोरिति दथादेशः। चिंतितइति। चिति स्मृत्यां।
चुरादिः। कृतं कृतमिति। प्रत्ययस्वरेणांतोदात्तावेतौ। असंज्ञार्थमिति। संज्ञायां तु निष्ठा च द्व्यज
नादिम्येव सिद्धं। शुष्कमिति। शुषेः क्तः। तस्य शुषः कइति कादेशः। आशितः। कर्त्तृवाचीति। आङ्

पूर्वादेशो बाध्यते एतस्मात्कर्त्तरि रिक्तो निपात्यते। अपर आह। कर्त्तेत्यनेन क्तप्रत्ययः गत्यर्थाकर्मक इति कर्त्तरि
लोकमी क्त एव चेच्छितः। तथाचाऽशेत्यर्थं तस्य प्रयोज्यकर्त्तरि गतिबुद्धिप्रत्यवसानार्थेति कर्मसं
ज्ञके निष्ठायामाशितइति। रिक्तइति। रिचिर् विरेचने। संज्ञायामित्यादिनिष्ठा च घ्यजनादित्यस्या
नकारः। ददाते स्युसः। अस्या नकारः। असंज्ञायां रिक्तोऽपवर्त्त इति। संज्ञायामुत्पत्प्रसंगे पूर्वविं
प्रतिषेधः। रिक्तो नाम कश्चित्। जुष्टार्पिते। जुष्ट अर्पित इत्येते शब्दरूपे छंदसि विषये आद्युदात्ते
वा स्तः। जुषी प्रीतिसेवनयोः। क्तः। श्वीदितो निष्ठायामितीट् प्रतिषेधः। जुष्टः। अर्त्तेर्णिचि अर्तीत्या
दिना पुक्। अर्पितः। नित्यं। जुष्टार्पितशब्दरूपे मंत्रविषये नित्यमाद्युदात्ते स्तः। पूर्वेणैव सिद्धे रिति न
नुपच्छेदे नोदात्तत्वमपि प्राप्नोतीत्याशंक्याह। छंदसीत्यादि। नकेवलं गतार्थत्वमात्रं किं त्वारभ्य
माणेऽस्मिन्त्रदोषोप्यस्तीत्याह। अर्पितांपदमिरित्यादिना। युष्मदस्मदोः। युष्मस्मिभ्यां मदिगिति मदि
कृत्प्रत्ययांतावंतोदात्तौ। ममेति। युष्मदस्मद्भ्यां ङसोऽश्। तवममौ ङसीति मपर्यंतस्य ममादेशः। शेषे
लोपः। अतो गुणे पररूपत्वं। एकादेश उदात्तेनोदात्त इति विनक्तेरुदात्तत्वे प्राप्ते इदमुच्यते। अपि
(वि) १२
ङयि च। योगविभागो यथासंख्यनिवृत्त्यर्थः। तुभ्यं मह्यमिति। ङे प्रथमयोरम्। तुभ्यमह्यौ ङयि च यनेति

स्या
त्वरितिमित्यपवादः। निष्ठा च घ्यजनादित्यतो घ्यजनुवर्त्तते तदाह। घ्यचइति। अत्रानावइति
निषेधो ज्ञापयति स्वरविधौ व्यंजनमविद्यमानवदिति। अन्यथाय आदिर्नकारो नासौ स्वरयो
ग्यः यश्च स्वरयोग्य आकारो नासावादिरिति प्रतिषेधोऽनर्थकः स्यात्। अनावः किं। नावानार्यं नाव्यं।
नाव्यं॥ ॥नौ वयोधर्मेत्यादिना यत्। घ्यचः किं। चिकीर्ष्यं। उत्तरत्रापि निस्वरः। ईडवंदा। ईडस्तुतौ। वदि अ
भिवादन स्तुत्योः। वृङ् संभक्तौ। शंसु स्तुतौ। दुह प्रपूरणे। एषतो घ्यनुबंधकत्वाद्य त्वग्रहणेन ग्रहणं
प्राप्नोतीति वचनं। ईड्य इत्यादि। [illegible] वोरिति एयत्। वार्यमिति। नन्वत्र एतिस्तुशास्वित्यादिना विहि
तेन क्यपा भाव्यमिति चेत्। सत्यं। संबुविधौ वृञ एव ग्रहणं नास्येति मूल एव स्पष्टं। विभाषा वेणु
शब्दो निस्वरे एव नित्यमाद्युदात्तः। पासः स्योः [illegible] रित्यनुवर्त्तमाने अजि वृरी भ्यो निःथैति व्युत्पादना
त्। इंधानशब्दोपदिश्चानशंतस्तदाविल्वादंतोदात्तः। यदाशानजंतस्तदा सार्वधातुकानुदा
त्तत्वे कृते। उदात्तनिवृत्तिस्वरेण मध्योदात्तः। श्नसोरल्लोप इति। उदात्तस्य श्नमोऽकारस्य लोप
त्। तथाप्यप्राप्तमाद्युदात्तत्वं पक्षे विधीयते। त्यागरागहासकुहश्वठक्रथानामुपसंख्यान(?)मिति कुत्सं रंजरागे। घस्नि
चाभावेतिन लोपः। हसेहसने। एषां पक्षे कर्षात्वतो घञोंत उदात्त इति। नयस्पचाद्यजंता इति

स्व १

कुह विस्मापने। अंठ असम्यग्भाषणे। चौरादिकावदंतौ। कप हिंसायां। अत्र प्रत्ययस्वरेणांतोदात्तत्वं
पक्षे भवति। मतोः। मतोः पूर्व आकार इति। आर्षव्याख्यानमेतत्। सूत्रे तु शब्दरूपापेक्षया नपुंसक
निर्देशः। के चित्तु सूत्रे पूर्वशब्दं पुंल्लिंगमेव पठंति। शरावतीति। चातुरर्थिकोऽनद्यां मतुप्। मादुपधाया
इति वत्वं। मतौ बह्वचः अनजिरादीनां शरादीनां चेति दीर्घत्वं। वेत्रवतीति। मतुपो वत्वं न चात्र वत्व
स्यासिद्धत्वाद् वतीशब्दो यं न भवतीति शंक्यं। तस्या अथासिद्धत्वे नासिद्धत्वाभावात्। अवत्या इति निर्देशा
दिह न भवति। राजवतीति। स्वरविधौ व्यंजनस्याविद्यमानत्वान्नियमवतीशब्दः। अहीवतीति। एवं च दीर्घ
संज्ञायामिति च लभ्य। अथ फिट्सूत्राणि। फिषोंत उदात्तः। फिडिति पूर्वाचार्यप्रसिद्धा प्रातिपदिक
मुच्यते तदाह। प्रातिपदिकं फिडिति। ननु कथमपाणिनीयानि सूत्राणि उपन्यस्यंते पाणिनीयसूत्रै
र्यः स्वर आयाति स एव प्रमाणं। तथा च शातनवशांतनवेति सूत्रे कैयटः। नियतकाला श्च
स्मृतयो व्यवस्थाहेतव इति मुनित्रयमतेनायं साध्यसाधुप्रविभाग इति नेन तत्। अपाणिनी
यान्यपि फिट्सूत्राणि पाणिनीयै राम्नीयंते नाध्यात्वज्ञापकात्। तथा च आद्युदात्तश्चेति सूत्रे
भाष्यं। प्रातिपदिकस्य चांत इति प्रसक्ते तरं तोदात्तत्वं शास्त्रीति तथात स्मिन्नेव सूत्रे प्रत्ययाद्यु १३

दिगादित्याद्यन्तर्यां तस्योत्या ५

प्रकृतिः समत्वं स्मिमत्वमिति। नहि फिषोंऽन्तउदात्तः। त्यत्त्वसमसिमेत्यादि फिट्
सूत्राप्रयुणं विना १

यस्व ४

दात्तत्वस्यावकाशः यत्रानुदात्तौ प्रकृ[illegible]तेरंतोदात्तत्वं सर्वानुदात्तत्वं सर्वमनुदात्तं च संभव
तीति दिक्। पाटला। पाटल्लेयपल्या दिव ओषधिविशेषस्य वाचकाः। लघावंत इति प्राप्ते गुरुर्वा
नामिति गोत्रान्यूनानामंत। उदात्तः स्यात् स्त्रियां नैगुद[illegible]स्य। अगेहार्थमिदं। धप्पूर्व। धकारेति। नि
त्यस्त्रिलिंगस्य शेषः। प्रातेर्यति। आद्युदात्तत्वे प्राप्त इत्यर्थः। यमंतत्वादिति। वध्रिषष्ठिलोपोंतिवचनाद्य
त्तोनाव इति। इन्नमर्हतीति ~~[illegible]~~ स्वाद्दिति। स्वत्राहूदे इति प्रत्ययस्वरेणावबोधक॥
खांतस्य। शाच मश्वरेमोनौ। आदीयस्य रश्मादिर्नश्मादिषु स्तके षुशाङ्गाहृस्वश्चेत्येव पचते मुहि
खोमूर्चेत्यतः खोऽनुवर्त्तते ह्रस्वविधानसामर्थ्यात् गुणाभाव इति। स्वयं[illegible]म प्युगो हित्वेवमेवोक्तं
तस्मान्पूर्वापरविरुद्धयं ग्रंथ इत्यस्वरसादाह। अंतरंगत्वादित्यादि। हित्वे। एषामित्यहि इत्व स्वरनि
रानयएतदंतानामित्यर्थः। बंहिष्ठ इति। बकुलशब्दान्निति शायनेतमबिष्ठनाविति इष्ठन् प्रिय
स्थिर स्फिरेत्यनेन बकुलस्य बंहिरादेशः। परिवत्सर इति किंचित् संवत्सर इति पाठस्तत्र वत्से
संपूर्वाच्चिदिति सर प्रत्ययस्यापि चिंदपि सिद्धं। सप्ततिरित्यादि। पंक्तिविंशतित्रिंशदित्यत्र बुलादिना
एते प्राग्वदिति। लघावंत इति प्राप्त इत्यर्थः। दक्षिणस्या अस्यांतउदात्तः प्राप्ती एप्येर्थवीणायां दक्षि

प्राप्ते इति। इ
द पूर्वणेऽपरे
णाय संबध्य
ते। पर्याया
इति। वदरी
विशेषस्य
वाचकाः।
प्राग इत्सु
मुइयोर्ल
घावंत इ
तिर

२बा।

र श्मादिस्तस्य। शकारमकारादिभिन्नस्य खांत शब्दस्यांतोदात्तं
स्यात्। शीङः खोनित् ह्रस्वश्चेत्यादि। ननु बहुषु उणादि

णः प्रवीण इत्यर्थः। छंदसि। दक्षिणस्याद्यंतौ पर्याये णिदात्तौ स्यातां वेदे। दक्षिणस्य। अस्यां त उदात्त छं
५२ दसि। न तु मृगाख्यायाम्। एवेति। तन्मते ऽस्मिन्सूत्रे नामधेयस्येत्यनुवर्त्तते वचनविपरिणामेनान्व
यः। नामधेययोः शुक्लगौरयोरादिरुदात्त इत्यर्थः। तेन सरो गौरो यथेत्यत्र नोदात्तत्वमेव नामधेय
त्वाभावात्। अंगुष्ठस्योदामं नोदात्तं छंदसि। अंगुष्ठस्येति। उपलक्षणमिदं बकशब्देपि। णिनां कु
पूर्वमित्यादि घुदात्ते प्राप्ते इति बोध्यं। वा भाषायां। एष्ठमिति। पक्षे स्वांग[illegible]टामित्याद्युदात्तत्वं। अर्जु फि०५
नस्य। अंते उदात्तस्तृणाख्यायाम्। तृणाख्यायां किं। अर्जुनो वृक्षः। उनर्वन्नंतानामित्याद्युदात्तः। अ
र्यस्यांतं। उदात्तः स्वाम्याख्यायां। अर्यः स्वामिवैश्ययोरिति निपातितोयमर्यशब्दः। आशाया अदिगाख्या
अंतो५ यामाशाशब्द आद्युदात्तः स्यात्। ज्येष्ठत्वादि। प्रशस्यस्य श्रः। ज्य चेति प्रशस्यशब्दस्येष्ठनि ज्यादेशः। प्रचणं अ
वः सो[illegible]स्याः सा। प्रववत्। धनं विद्यते यस्याः सा [illegible] नवती। अतिशायिना [illegible] प्रवती धनवती अविद्यां इष्ठनि विनि उ धनि ष्ठा४
[illegible]र्लुपो गितिमलुपो लुक् आद्युदात्तो प्राप्त इति। विन्मतोरित्यनेन [illegible]लुकिति। लघावंत इत्याद्युदात्तत्वं ध
त्तमिति। न विषयस्येति प्राप्ते। ज्येष्ठ इति। उदाहरणे वृद्धशब्दस्य वृद्धस्य चेति इष्ठनि ज्यादेशः। युवाल्पयोः कन १४
न्यतरस्यामिति युवन्शब्दस्य कनादेशः। प्रत्युदाहरणे प्रशस्य अज्य चेति प्रशस्यशब्दस्य ज्यादेशः। अल्पस्य कन्।

बृविर

ल्पनिवादिति। तथा च निरुक्तरापवादोयं योगः। पक्षे उदात्त इति। उदात्त इत्यनुवर्त्तते। इति प्रथमः पादः।
नक्विषयस्य। इस्तं तवर्जितस्य नित्यनपुंसकस्यादिरुदात्तः स्यात्। सर्पिरिति। अर्चिःशुचीत्यादिना इसिः।
तृण। तृणवाचिनां धान्यवाचिनां च ब्रह्मचामादिरुदात्तः स्यात्। अमीति अचः प्राचां संज्ञा। तदर्हाण
चामित्यर्थ इति। गोधूमा इति। लघावंत इति मध्योदात्तानां [illegible] नकाररेफांतायां संख्याया आदिरुदा ने०१४
त्तः स्यात्। चतुष्कपाल इति। चत्वार इत्यत्र आम्स्वरेण नाप्यं। चतुर इत्यत्र चतुरः शसीति। चतुर्भिरित्यत्र
उल्बु [illegible]युपोत्तममिति। चतुर्णामित्यत्र षट्त्रिचतुर्भ्य इत्यनेनेति समासउदाहृतः। इगंतकालकपालभग
लेति पूर्वपदप्रकृतिस्वरेण घुदात्तोयं। स्वांगशिटां। स्वांगवाचिनामदंतानां सर्वनाम्नामादिरुदात्तः
स्यात्। उदकमिति। छंदसि अंगुष्ठोदकबकवशानामिति तोदात्त[illegible]। भाषायां तु कर्दमादित्वाद्द्वि
तीयं वोदात्तं। उनर्वन्नंतानां। उन [illegible] त्रचन् एतदंतानामादिरुदात्तः स्यात्। इस्वांतस्य। अन्तर्किं। न
स्याक्षे शंसः। अन्तस्य। अदेवनं स्यादिरुदात्तः। वंचेवेति। [illegible] मनुष्य इति। कनो खुपुः लुबंतस्य किं। अग्निमणि
वकः। न वृक्ष। पूर्वेण प्राप्तमाद्युदात्तत्वं निषिध्यते। अत्र वृक्षपर्वतविशेषग्रहणात् वृक्ष इवायं वृक्षः
पर्वतः। अत्र पूर्वेण प्राप्तमाद्युदात्तत्वं न वत्येव। राजविशेषस्य। लुबंतस्यौपम्यनामधेयस्य राजवि

आ१

कौ॰स्वर॰टी॰
सुबोधिनी॥
१५

शेषस्यादिरुदात्तः यमन्वा चेन्नामधेये भवति। पूर्वेणैव सिद्धे नियमार्थमिदं। राजविशेषस्य चेद्यम
न्वेवेत्याद्यः। फिट्सूत्रे तु वृद्धस्य चेत्तर्हि राजविशेषस्यैवेति नियमो दर्शितः। आंगइति। आंग इवायम
गः। आंग इवायमंगः। लघावंते इत्यादिरिति न संबध्यते। तेनाऽनादेरपि गुरोरुदात्तः। अतएव वृषाकपि
शब्दस्य गुरुरुदात्त इति वृषाकपय्ग्नीति सूत्रे इत्यादिग्रंथेषु विना विनम्र। न च गुरूणां मध्ये आदि
त्यर्थोस्त्विति वाच्यम्। अन्यतोडीषिति सूत्रे सारंग कल्माष शब्दौ लघावंत इत्यादिना मध्योदात्तावितिस
रदत्ता ग्रंथविरोधादित्याद्यः। कश्याण इति। पर्यायेणाद्यमध्यावुदात्तौ। शकुनीनां। पक्षिवाचिनां। पूर्वमिति
अंत्यात्पूर्वमित्यर्थः। अत्राप्यादिरिति न संबध्यते पूर्वग्रहणात्। कुक्कुरेत्यादि मध्योदात्तावेतौ। नर्त्तकुलवाचिनां २३
प्राणवाचिनां च यथालक्षणप्राप्तमुदात्तत्वं। [illegible]र्णानां धान्यवाचिनां रेफकशब्दांतानां षशब्दांतानां चा
दिरुदात्तः। श्यामाकाः माषा इति। अत्रोशीनरे [illegible] नेन तालव्यान्नामित्यनेन चाद्युदात्तत्वस्य च सिद्धत्वात्
निषादुकाः राजमाषा इत्युदाहर्त्तव्यां। फिट्सूत्रे तु सूत्रे [illegible] च शब्दो न पठितः। वृत्तौ तु गुरुरुदात्त इति व्याख्या
तं [illegible] त्वादिरुदात्त इति निषादुकाः [illegible] वलासा इत्युदाहृतं च। पत्तु धान्यानामिति किं। शपामाका इत्युदा २५
हृतं। ननु श्यामाके धान्यत्वाभावश्चिंत्यः। जनपदानां जनपदवाचिनामजंतानामादिरुदात्तः स्यात्। केकय

इति। अत्र परत्वाद्यां तस्यां त्यात्पूर्वमिति स्वरेण भाव्यमतः अंगा वंगा इत्युदाहर्त्तव्यमिति वदंति। हलन्ता
दीनां। हलादीनामसंयोगपूर्वो यो लशब्दस्तदंतानामादिरुदात्तः। अंत्यात्पूर्वं चा। केचित्तु। अत्र जनप
दानामित्यनुवर्त्तयंति पंचालाः कोसलाः इत्युदाहृत्य पललमिति प्रत्युदाहरंति। तच्चाऽशां। अत्रापि जनप
दानामित्यनुवर्त्त्य। कुरवः चेदयः इत्युदाहृतं कृषिरिति प्रत्युदाहृतं। अस्त्रेमादीयः कृषिमित्यकृषस्वेत्य
त्र कृषिशब्दस्यांतोदात्तत्वात्। इति द्वितीयपादः। कपोल इति। लघावंते इति मध्योदात्तत्वं। रसनाववनं इ
त्या॰द्यु॰३ ति। त्वांगशिरामिस्युदात्तत्वं। मादी। मलयः मकर इति। अनयोः मकरवरूढे तियांतस्यांत्यात्पूर्वमितिप
ठित्वा सर्षपा इत्युदाहरन्ति। पांतानां। परादान्तानां गुर्वादीनां च चांद्वितीयमुदात्तं स्यात्। अन्त्ये अनोर
प्रधानकनीयसीत्यनेनोदात्तत्वं नीपेनेरनिधान इत्यनेनेत्याद्यः। युतायुतत्र अनिअणिए न दन्तानां अचां त्य॰
द्वितीयमुदात्तं स्यात्। इत्यादीनि। आदिशारेनपारेवनचितस्ता[illegible]सु आर्जि[illegible]शाकला उमा[illegible]काष्ठा
पेथा[illegible]शीनां काशीनानामिति वक्तव्ये तुडशनाव आर्षः। छंदसि। छंदसि मकरादीनामन्येषां चादि[illegible]द्वि
तीयं वोदात्तम्। काश्यपः। कर्दमा कर्दमः। कुर्वंडे उदकागांधारि। सुगंधि आदिरिति। सुगंधि तेजनशब्दस्या
नपाफलांतानां नपूनपुंसकेन पूर्किं। दासीफलो हरकः। [illegible]तस्य। परादान्तस्यांत्यात्पूर्वमुदात्तं स्याद्वा। धांतस्य त्या॰२
६१ केचित्तु आंतस्य च नालघूनीति पठित्वा आकारांतस्य नाराचः लघुनी अंत्यात्पूर्वे उदात्ते स्त इति व्याख्याय

१६ नानादिवामृधे त्युदाहृतं। शिशुमारा शिंशुमार इति पाठांतरं। उष्ट्रार उष्टार इति पाठांतरं। सांकाश्या सां
धुर काश्यकांपि [illegible] शब्दौ घुंञ्छणे तिल्पांतौ। दार्वाघाट शब्दो दारावाहणोऽणंतस्य च टः संज्ञायामि। ल्वण अस्य
यांतः। ईषांतस्य। ईषांतस्य आदेरादिरुदात्तो वा स्यात्। उशीनरं अत्र श्यामाकग्रहणं चिंत्यं। धान्यानां च
वृद्धक्षांतानामित्यनेनैव सिद्धत्वात्। इदमेव ज्ञापयितुं मूले धान्यानामित्यत्र श्यामाक इत्युदाहृतं। देवयैरे
हणमपि चिंत्यं। लघावंत इत्यनेनैव सिद्धत्वात्। हृदयग्रहणं स्वांगानामकुर्वादीनामिति द्वितीयस्योदात
त्वं बाधितुं। अन्येषां लघावंत इति प्राप्ते वचनं। मद्रिषां एतयोरादिरुदात्तः स्यात्। यथा संख्यं ज्ञायारा
मिष्टकाख्यायां चोऽइति न्तीक्षा न्वल्बो। एतानि सर्वानुदात्तानि। भसिमस्यां सिमशब्दस्य पर्वणेवेदंत
अभि दात्तः। उपसर्गाश्चाभिवर्जं। अभिशब्दं वर्जयित्वा उपसर्गा आद्युदात्ताः स्युः। यथेति। यथापि पशब्दः पादांते नुदात्तः
स्यात्। प्रकारादि। प्रकारे गुणवचनस्येत्यादि द्विलेपरस्यांनोदात्तः स्यात्। पटु पटुरिति। ननु चकर्मधार
यवउत्तरे घिति कर्मधारयवज्ञावादेव समासस्येत्यं नोदात्तत्वे सिद्धे व्यर्थमिदमिति वाच्यम्। तस्य पाणि
नीयात्पूर्वप्रवृत्तत्वेनादोषात्। शेषं। प्रकारादिद्विलादन्यस्मिन् द्विले परं सर्वमनुदात्तं स्यात्। इति चतु
र्थः॥ ॥इति श्रीमन्मौनिकुलतिलकायमानश्रीगोवर्द्धनभट्टात्मजरघुनाथभट्टांगजेन जयकृष्णेन १६
कृतायां सिद्धांतकौमुदीव्याख्यायां सुबोधिन्यां फिट्सूत्रव्याख्या समाप्तिमगमत्॥ ॥अथ प्रत्ययस्व

राः। अग्निरिति। अंगेर्नलोपश्चेति निप्रत्ययः। कर्तव्यमिति। तव्यप्रत्ययः। तव्यतस्तु तित्वात्स्वरितो वक्त
धुर त। नचैवं तव्याद्युदात्तत्वे उदात्तादनुदात्तस्येति स्वरितो नवस्येवेति चेत्सत्यं। किंत्वयमसिद्धः। तित्स्वरस्तु
त्यप्रर३ सिद्ध इति प्ररल्पे न्निष्पंगमत्तत्फले विशेषः। तव्यतस्तित्वमेव शेष निघातपरिभाषायाः प्रयोदेशाप्र
वृत्तौ ज्ञापकमिति ध्येयम्। युष्मनीति। युष्म प्रमादे धातोरित्यंतोदात्तः। ततः परः शब्दु दात्तादनुदा
त्तस्येति स्वरितः। स्वरितात्संहितायामनुदात्तानामिति क्विपः प्रचयः। चितः। चितः सप्रकृतेरिति। न
न्विदं कपंलब्ध्वामिति चेत्। शृण्वचित इत्यवयवादेशषष्ठी न कार्यिणः। चितयोऽवयवस्तत्संबं
धीयः समुदायः स कार्यी॥ अथवा चिदस्यास्तीति चितः। अर्शआदित्वादच्प्रत्ययः षष्ठ्यर्थे आ
स्ये प्रथमा। तेन विहितः समुदायस्वर्पः। अत्र च लिंगं कमेव ब्रियत्करणं। अन्यथा तस्यैकाच्त्वादनर्थकं त
स्यात्। प्रत्ययस्वरेणैव सिद्धत्वात्। अन्यक इति। अव्ययसर्वनाम्नामित्यकच्। ततः परत्वेरुदात्त॥
एवं यकेत क इत्यत्रापि यत्तदादकच्। बकुचत्रादाहरणं तु बकुपटव इत्यादि ज्ञेयम्। तिस्वर अिर
बाधनार्थमिति। चकारः। अकारो ग्रातचकजोरस्त्रियामिति विषये चरितार्थः। नकारो वृद्धौ तत्रासत्य
स्मिन्परत्वात् जित्स्वरं स्यादि तिभावः। कौंजायना इति। कुंजस्यापत्यानि बहूनि गोत्रे कुंजादि

सिम युप्र किं कृदन्तमभवतीत्यर्थो भवति। भवतियायमध्येपेस्तने एकाच्। राजदृति। राजशब्द आद्युदात्तः। कनिन्युवृषितक्षिराजिधन्वि
तिदिवइति कनिन्प्रत्ययान्तत्वात्। अंतोदात्तात्। एकाच इत्यनुवर्तते स्त्रीयादि। ज१

कौ० स्व० टी० सुबोधिनी ९७

स्व... स्त्र। त्रातर्फ ओरस्त्रिपामिति ज्यः। ज्याद्यस्तद्राजा। स्तद्राजस्य बहुषु लुक्। आग्नेय इति। अग्ने ढ
क्। तिसृ अर्थं गतं बहुत्वं शब्दे आरोप्य बहुवचननिर्देशः। तिसृभ्यः परस्य जसो न उदात्तः स्यात्।
तिस्र इति। अंतोदात्तस्य त्रिशब्दस्य स्थाने तिसृ आदेशः स्थानिवद्भावादंतोदात्तः। अनुदात्तौ सुप्पि
ताविति जसनुदात्तः। अचि र ऋत इति रेफादेशे कृते उदात्तस्वरितयोर्यणः [illegible] इति जसः स्वरि
तत्वं प्राप्तमनेन बाध्यते। सप्तमी बहुवचनमिति। न अपमेकवचनं व्याख्यानात्। राज्ञेति। सावेक
तस्मिन्नसति एकाचः परात् तृतीयादिर्विभक्तिरितिच। नित्यशब्दः स्वर्यते तेन नित्याधिकारगतिर्लभ्य
त्वात्। नित्याधिकारेत्यादि। अनित्यसमासे किं। अग्निचित्। अग्नौ चेरे निक्विप्प्रत्ययः। उपपदसमासः
गतिकारकोपपदात्कृदिति कृदुत्तरपदप्रकृतिस्वरेण चिच्छब्द उदात्तः। अधिकारग्रहणं किं। विग्रह
नावमानेनाणयो नित्यसमासस्तत्पुरुषो दासो माभूत्। आ[illegible]नबहुव्रीहिणा न स्त्रुभ्यामिति अं
तोदात्तत्वं मा भूत्। अत्र विभक्तेर्वैकल्पिकोदात्तो भवत्येव। अंतोदात्तात्किं। नैवाचां नञ्समासोयं न तु
बहुव्रीहिः। तेन नञ्सुभ्यामित्यंतोदात्तत्वं न भवति। किं त्वव्ययपूर्वपदप्रकृतिस्वर एव भवतीत्यर्थः ९७
उत्तरपदग्रहणं तु एकाच्त्वेनोत्तरपदं विशेषयितुं। अन्यथा समासविशेषणं स्यात्। तथा च शुनः

ऊर्क्। श्वोर्द्वः। चोर्जः इत्यादावेवायं विधिः स्यात्। एकाचः किं। राजदृषदा। षष्ठीसमासान्ता दधीच इति
दध्यं च गीति ऋत्विगादिनाक्विन्। अनिदितामिति नलोपः। अच इत्यकारलोपः। चाविति दीर्घत्वं। अत्र चा
विति पूर्वपदांतोदात्तत्वं प्राप्तम्। शस्प्रभृत्यचीति। शसादिग्रहणं तु नन्तर्तम्। नपुंसके शसि मा
भूत्। सु टि न यथा स्यादिति। ऊडिदं। अत्र एकाच इति वर्तते अंतोदात्तादिति च। एकाजंतोदात्तेभ्य
परः सर्वनामस्थानविभक्तिरुदात्ता न स्यात्। प्रष्ठौह इति। छंदसि सहः। वह श्चेति ण्विः। वाह ऊठ्। उ
६३ पपदसमासे न प्रष्ठवाहुशब्दो गतिकारकोपपदादित्यंतोदात्तः। अत्र प्रष्ठौहशब्दस्यानेकाच्
त्वेपि ऊठ् वाहस्यैकाच्त्वमेव। ऊठ्युपधाग्रहणमिति। उपधाभूत ऊठ् गृह्यते न त्वंत इत्यर्थः
पंचमीनिर्देशात्परस्यैव ग्रहणं प्राप्तं वचनं तेनात्र घूरित्यादौ विभक्तेरुदात्तत्वं। अत्र हि
६४ अक्षद्यूरिति। निक्विप्। अंतरंगत्वाद् ऊठ् यण्। उपपदसमासत्वात्कृत्स्वरेणांतोदा
त्तोयं। अन्वादेशे नेति। अत एव सावेकाचइ [illegible] स्वरोन। यदि स्यात्तदा तदंतोदात्ता
धिकारो व्यर्थः स्यात्। प्रतेब इति [illegible] अन्वादेशप्रदर्शनार्थं माभ्यामित्युक्ता। माभ्यामिति। अत्र
पूर्वार्धे इदं शब्देनोक्तयोरिहेदमा परामर्शे अन्वादेशोऽस्त्येव। अन्वादेशश्च कथितानुकथनमा

जिन्नार ९१ ग्यार

स्था२

किं दीर्घग्रहणेन जानतीति। शानजनोर्ज्ञे इत्यादेशः। आभ्य-
स्तयोरात इति आकारलोपः। अत्र प्रत्ययस्वरेण शानच नमे
नोदात्तः। तत्र एवेति।

१८ त्रं नत्विदमाकृषिमस्येदमेव कंपनमिति भाष्योक्तेः। षट्पदादय इति। ननु ततः परेण एकाच इत्यनुवृत्तेः।
अष्टनो दीर्घात् इत्यनेन परात्सर्वनामस्थानविभक्तिरुदात्ता उं स्युपोत्तममित्यस्यापवादः। अष्टनूशब्दे
नो३ घृतादित्वादंत्योदात्तः। तेनोत्तरार्थमनुवर्तमानस्यांतोदात्तादित्यस्येहाप्राप्तिः। नन्वयः दीर्घात्किं। अष्ट
भिः। इह [illegible] स्युपोत्तममिति स्वरः। ननु चात्राष्टन आ विभक्ताविति त्वेनेन भवितव्यं तद्विधौ विक
ल्पस्याभावादिति चेत्सत्यं। इदमेव दीर्घग्रहणमष्टन आत्वविकल्पं ज्ञापयति। नित्ये त्वात्वे व्यावर्त्या
भावाद्दीर्घग्रहणमनर्थकं स्यात् ठलात्वस्य षट्संज्ञां च ज्ञापयति। अन्यथा ह्यात्वपक्षे सावकाशो
ष्टनः स्वरः परत्वादनात्वपक्षे षट्स्वरेण बाधिष्यत इति। धिन्विकृण्व्योरच्च। तुदतीति। तुदादित्वाच्छः।
छी५ [illegible]। आ शीनयोरिति नुम्। प्रत्ययस्वरेण [illegible] विकल्पनां परिहरति। एकादेश उदात्त इति कुर्वती
त्यत्र शोरुक्ते तस्मात्परस्य शतुरुपदेशात्लसार्वधातुकानुदात्तत्वे तिनिघाते एकादेश इत्यस्य एकादे
श उदात्तेनोदात्त इत्युदात्तत्वं। अस्मिन्कर्तव्ये तस्यासिद्धत्वं नास्ति। अनुम इति प्रतिषेधात् ज्ञापकात्।
नह्येकादेशस्वरेण विना शत्रं तस्य नुमकमंतोदात्तं भवति। उदात्तयणो हल्पूर्वात् उदात्तस्वरितयोर्यणः स्वरि १८
तोनुदात्तस्येति प्राप्ते वचनं। चोदयित्री नेत्री सं [illegible] इति ऋजं [illegible] नेति नइत्यं नोदात्तः हल्पूर्वादिति किं।

बहुतितवाशलष्यास्त्रिलिंगोपादानं नाभावेति तस्यार्थः। ननोनेर्ड [illegible] सन्व चेति उङः। वाल्मनीति [illegible]
पुमान्। बहोर्नञ्वदुत्तरपदभूम्नीति बहुशब्दोपि रतोदात्तः। बहोर्दात्तस्वरितयोरिति विभक्तेः स्वरित
त्वं। अस्मिन्सूत्रे नकारग्रहणं चकर्तव्यं उदात्तस्थाने यो नकारस्ततो पि रस्यान्यद्या नुदात्तत्वं वक्त घा२
व्यमित्यर्थः। तेन वाचापतिः वाक्पत्नी निसिद्धं। अत्र द्विपत्यावैश्वर्ये इति पूर्वपदप्रकृतिस्वरस्य नञ्
धि५ वाक्। चिद्दिधिनिप्रतिषेधात्समासांतोदात्तत्वेपि विभाषासवर्णस्येति नकारेनांतत्वान्ङीप् अ
नेनोदात्तः नोङ्। शसादय इति। यद्यपि पूर्वसूत्रेन [illegible] ज्ञादीत्यनुवर्तते तथापि ऊङ्धात्वोर्यणः प
रानदीन संभवतीति नानुवर्तिता। ब्रह्मबंधवेति ऊः प्रत्ययस्वरेणोदात्तः। तेन सह यण् एकादेशः सोप्यु
दे५ दात्तः। तस्मात्परस्योदात्तत्वप्रतिषेधो उदात्तस्वरितयोर्यणः स्वरितोनुदात्तस्येति विभक्तिः स्वरिता सु
भ्रेरिति किं वंतस्यत्तदुत्तरपदप्रकृतिस्वरेणांतोदात्तस्य ओः सुपीति यणः। अब्भिमानिति आपोदी
यतेस्मिन्निति कर्मण्यधिकरणे चेति किः। उदनिशब्दोऽप्युत्पन्नः। अस्य घृतादित्वादंतोदात्तत्वं बोध्यं।
न्यएयं२ अन्यपायुतां [illegible] तानामिति द्वितीयस्योदात्तत्वं प्रसज्येत। मनुवसोरुसंबुद्धौ छंदसीति रुः। आतोटि
नित्यमित्यनुनासिकः। अत एवं तइति अद्विशब्दोयं नुप्। अक्षिदधिसक्थ्यक्ष्णामनङुदात्त इति ब्रं

५८ ह्रस्वपि दश्यत इत्यर्थे नडः । अनो नुडित्यस्यासिद्धत्वात्पूर्वं न लोपः । ततो नडुतपूर्वगत्वात् मतुपो नुट् । मादुपधा
यादिति वत्वं । ह्रस्वनुडिति । धात्वोनि दित्यधिकारे रूपेः किं चेति उपलक्षणं तत्र आद्युदात्तं इन्दुशब्दः । तस्मात्परो मतु
बनुदात्त एव । ननु मरुत्वतः स्यूसंतो । तिमरुत्वात् । अत्र मतुबुदात्तत्वं प्राप्नोति । मृत्यों । तिरित्युत्ति प्रत्य ६३
ये प्रत्ययस्वरेण मरुच्छब्दस्यान्तोदात्तत्वात् । न च तकारेण व्यवधानं स्वरविधौ व्यञ्जनस्याविद्यमानत्वात् ।
अत आह । स्वरविधावित्यादि । नेभ्यं इति । समासस्येति सूत्रेण मरुत्वानित्यत्र ह्रस्वनुड्भ्यां मतुबिति स्वरः प्राप्नो ४इभ्यां१
तीति दोषमुद्भावयन्दूरस्वर भाष्यवित्ति नाथ्योक्ते रितिभावः । रेवानिति । रयिरस्यास्तीति मतुप् । रय्येर्मतौ ।
बहुलमिति संप्रसारणं पूर्वरूपत्वं आद्गुणः तलोकृत्वा भावाद्वचनं । मनुबुग्रहणं चेन्द्विसमप्या
विपरिणम्यते । तेन ह्रस्वविशेषणं किं । भूतपूर्वे पि । ह्रस्वे यथा स्यात् । अग्नीनामित्यादौ अन्यथा परत्व
न्नित्यत्वाच्च दीर्घे कृते ह्रस्वाभावान्न स्यात् । तिसृणामित्यत्र सांप्रतिके ह्रस्वे स्यात् सांप्रतिकाभावे भू
तपूर्वगतिर्न वति न तु सत्यपि तस्मिन् । नन्वेवं तिसृणामित्यत्र न स्यात् मतुपि तिसृभावस्यैवाभाव
त् इष्टमेवैतत्संगृहीतं । अत्र हि षट्त्रिचतुर्भ्यो हलादिरिति नित्यमेव विभक्तेरुदात्तत्वमिष्यते । ष १९
नोंनद्यानां१ ड्भिः अन्तोदात्तादित्येतन्निरन्तं । यथा तदनुवर्तने न पंचानां चतुर्णामित्यत्र न स्यात् । संख्याया इत्या

४ह्रस्वो विशेष्यते नद्याः । मतुपि यो ह्रस्व इति सुमती नामिति । सुमतिशब्दो बहुव्रीहिः । नञ्सुभ्यामित्यन्तोदात्तः । मतुपा ५
नाम न्याः ह्रस्वग्रहणमनुवर्तते ।

घुदात्तत्वात् । कतर्हि स्यात् । सप्तानामष्टानां । सप्ताष्टशब्दौ घृतादित्वादन्तोदात्तौ । हलादिः किं ।
चतस्रः पश्य । यथैतद्धलादिग्रहणं स्पष्टं तथा चतुरः शसीत्यत्रैवावोचाम । नगोः सा
वितियद्विसप्तमीबहुवचनग्रहणं स्यात् । तेभ्यः केभ्य इत्यत्र न स्यात् । तत्किंशब्दयोः सप्तमीब
४परतः दाघत्वे ते बहुवचने ऊ४ हुवचने अस्येदित्येत्वविधानात् । तेषु केष्वित्यत्र वर्णातत्वाभावात् । ताभिर्याभिरित्यादौ वैरूप्या
त् । तासु यास्वित्यत्र वर्णतत्वात्तस्मात्प्रथमैकवचनमित्याह । सो प्रथमैकवचन मि
अन्तोदात्तो विराडः इति । अनंतरप्रतिषेधान्नाव्याः अपि कस्वरस्य प्रतिषेधो
विज्ञायत इत्याह । प्रागुक्तं नेति । एवं च वीरवंतमित्यत्र ह्रस्वनुड्भ्यां मतुबिति न वर्त्तिस्फायितंची ४इभ्यां१
त्यादिना रक्ति अन्तोदात्तो वीरशब्दः । गोष्विति । सावेकाच इति प्राप्तं । शुनश्शेपमिति । अत्र चिदिति ४१
पदं संहितापाठे बाहुलकात् शुनःशेपशब्दमध्ये प्रक्षिप्यते । पदकाले तु शुनःशेपं चिदिति पठ्यते । शेपपु
च्छलांगूलेषु शुन इत्यलुक् । वनस्पत्यादित्वादुभयपदप्रकृतिस्वरः । ध्वन्शब्दे तेभ्यः तेषामित्यत्र च सावे
काच इति प्राप्तं प्रतिषिध्यते । राष्ट्रराज इति । क्विबन्तः राजा । अञ्चितिः अंचतिः क्विबंतः तस्य सनकारस्य ग्रह
णं विषयावधारणार्थं यत्र नलोपो नास्ति तत्रैव प्रतिषेधो यथा स्यात् । प्रांचा । प्राञ्चां । नांचेः पूजायामिति ।

२० प्रतिषिध्यतेन लोपः। अंचेः छंदस्यसर्वनामस्थानमितिप्राप्तं प्रतिषिध्यते। गतौ नु विनमुदात्तः स्यादेव। भा
चा। प्राचे। कुडितिक्विन्नंतः। कुञ्चा। कुञ्चकौटिल्याल्पीभावयोः। ऋत्विगित्यादिना क्विन्। तत्रैव रूत्रे कु
ञ्चेति निपातनान्नलोपाभावः। कृत्। करोति। कृतमिति क्विबंतः। कृता। कृते। दिवो। ऊडादिरिति। नन्व
सतिसप्तमीनिर्देशे कथं पुनरत्र तदादिविधिः। केवल ऊडालानिकायाविभक्तेरभावादेव तदादिविधिः। न
३५ नु तर्हि तदंतविधिरस्तु का पुनरौ जंनाविभक्तिः शसादिसकारांतादिति चेत्सत्यं। षड्त्रिचतुर्भ्यो हलादि
रित्यतः आदिरिति वर्त्तने दिवः परा विभक्तिर्नोदात्ता भवति कोद्दशाय स्याऊडादिरिति। द्युभिरिति।
सावेकाच इतिऊडिदमिति वा प्राप्तः स्वरः प्रतिषिध्यते। दिवेदिवे इति। ऊडिदंपदादिति विभक्तिरुदात्ता। तिस्व। तिस्वरितं ३४
स्यात्। निगदव्याख्या ~~...~~ किमोत्। तिस्वरितं। कातीति किमः कादेशः। तास्यनु०।
३४ तास्यां नां समाहारद्वंद्वः। उपदेशयलणसंभवं व्यभिचाराभ्यां डिदभ्यां संबध्यते न तु ता स्यौ नुदात्तेत्यां डि
दिति कर्मधारयः। उपदिश्यत इत्युपदेशः। तस्याकारेण डिता च विशेषणात्तदंतविधिः। तथा च सूत्रार्थः। ता
३२ सिरनुदात्तेतो डिदुपदेशादकारांतोपदेशाच्च परं लसार्वधातुकमनुदात्तं स्यात् हुडिङौ वर्जयित्वा। कर्त्ता।
कादिलुटः प्रथमपुरुषस्य डारौरसः। एकवचने डित्वात् टिलोपः इतरत्र रिचेति सलोपः। आस्त इत्यत्रा २०
तमिति। उच्चारणेनैव व्याख्यातमित्यर्थः। केति।५
तरि१

मितिसिद्धो निघातः। स्वावयवेन व्यवधानाभावात्। यद्यकारांतस्यांगस्य मध्ये मुकूतदा
अदुपदेशस्य सार्वधातुकं। २
कू।१
दादित्वान्लोपो मुक्। डित इति। अस्याप्युपदेशेन विशेषणान्नेह। स्टम्रे ते जरि तुहवं। अत्र भुरतिदे
४२ शेन डितः। चनसं न मिति। चनो ऽन्नं नदात्मन इच्छतं इत्यर्थः। क्यप्। लोदृ्थस स्तंश पूसचानुबंधस्या
निकांतत्वादुपदेशः। चित्स्वरोपीति। चित्स्वरस्यावकाशः। चलनः। चलनशब्दार्था दकर्मकाद्युच्।
अस्यावकाशः। आस्ते इत्यादौ वर्द्धमानमित्यत्र त्वयं निघातश्चित्स्वरं बाधते परत्वादिति भावः। वृधु
वृद्धौ लटः शानच्। शप्। आने मुगिति मुक्। नचात्र मुकाव्यवधानं। यद्यप्यकारस्यागमो मुक् तदा मु५
कारोपदेशात्परं लसार्वधातुकमात्रापेक्षत्वादंतरंगस्वरं प्रति अकारांतविशिष्टांगप्रत्ययापेक्ष
त्वबहिरंगस्य मुकोऽसिद्धत्वात्सिद्धो निघातः हत इति। अनुदात्तोपदेशेत्यनुनासिकलोपे कृते स
त्यकारांतात्परं लसार्वधातुकं भवति तथाप्युपदेशग्रहणान्न भवति नहि हंतिरदंत उपदिश्यते। क
तीहपचमाना इति। ताच्छील्यवयोवचनशक्तिषु चानश। क्वचित्तु कतीह निघ्नाना इति दृश्यते त
त्र निघ्नशब्दश्चाचारक्विबंतात्छांदसो मुगभावः। शिश्ये इति। एरनेकाच इति यणादेशः। लिट् चेत्य
त्यार्द्धधातुकमेतत्। यदधीन इति। यच्छब्दप्रयोगो निपातैर्यद्यदीति निघातप्रतिषेधार्थः। अत्रप्र
त्ययाद्युदात्तत्वमेव। चिट् विचारणे। जिइंधी दीप्तौ। खिद दैन्ये इति। त्रयोऽनुदात्तेतः। तेभ्यः परस्
घु

सार्वधातुकस्यानुदात्तत्वे प्राप्ते आह। विदीप्यादि। इत्यतः परस्य लसार्वधातुकस्यानुदात्तत्वं नेति वक्तव्यमि
त्यर्थः। यासिष्टमिति। यासापतोः। लुङ् थस्। तौञ्जि लुङि ञ्जेः सिच् यमरमनमातामिति इट् सकौ। बहु
लं छंदस्यमाङ्योगेपीत्यडभावः। इदमाद्युदात्तत्वाभावे उदा--हरणं। आद्युदात्तत्वे तूदाहरणां
तरं मृग्यम्। पर्त्तीति। आदिर्णमुल्यन्यतरस्यामित्यतोऽन्यतरस्यामित्यनुवर्त्तमाने ग्रहणं कार्यविकल्पा वा४
र्थं। अन्यतरस्यांग्रहणेन कार्यविकल्पस्य सिद्धत्वात्। तेनेडादयः पर्यायेण कार्यं प्रतिपद्यंते। ननु त
चैषां तत्र युगपदित्यादौ युगपद्ग्रहणादेवान्यत्र पर्यायः सिद्धः। सत्यं। आदेरपि प्राप्त्यर्थं वा
ग्रहणं। अन्यथा श्रुतयोरिडंतयोरेव कार्यित्वं विकल्पेन स्यादिति। यशोपलित्स्वरः। ननु इट्ग्रहणान्नि या
डिवचन् ग्रहणीष्यत इति चेत्सत्यं। इट्ग्रहणं तु यदा इडागमः क्रियते न यदा तस्योदात्तार्थं स्यात्। यथ
कर्त्तुः सर्जइ सजोपस्येत्यत्र सः। ततश्च यथा तुल्यविधेत्यादौ चतुर्णां पर्यायेणोदात्तविधाने पंचमे यथि४
स्यादौ चतुर्णामभावेपि पर्यायेणोदात्तत्वं भवति तद्वदिडभावेपि स्यादित्यर्थः। आख्यनीय इति। आ
कुर्यकाद्धिकरणेऽनीयर्। प्रीणनार्थात्कर्मणि वा ततो गतिसमासे कृदुत्तरपदप्रकृतिस्वरः॥ ॥इ २२
तिप्रत्ययस्वरः॥ ॥समासस्य॥ ॥यज्ञश्रिय इति। षष्ठीतत्पुरुषः। श्रीशब्दे ईकारस्योदात्तत्वे कृतेऽत्र

त्यैर

त्रस्तम्यादियणुदात्तः। वक्रश्रीहौ। इहोदात्तस्वरितग्रहणमनुवर्त्तमानं तदिति वर्त्तते पूर्वपदस
त्रै मानाधिकरणपात्र्यं प्रकृत्या नावड्डुक्के पिस्वर प्रकरणात् प्रकृतिस्वरेणैव प्रकृतिभावो विज्ञाय
ते पूर्वपदस्य प्रकृतिभावस्त्वस्य यो रुदात्तस्वरितयोः प्रकृतिभाव द्वारेणोल्पाशये नाह। उदात्तस्व
रितयोगीति। चित्रेति। श्रूयत इति श्रवः कीर्त्तिः चित्रं श्रवो यस्य स चित्रश्रवाः। तत्र समपूर्वचित्रशब्दः
फिट्स्वरेणांतोदात्तः। ततः परस्योदात्तादनुदात्तस्येति स्वरितः। ततः परस्य स्वरितात्संहितायामनुदात्ता
नामिति प्रचयः। समपाद इति। त्वत्वसमसिमेत्यनुच्चानीति सर्वानुदात्तः समशब्दः। पादशब्दो वृषादि नां
त्याद्यु चेत्युदात्तः। अत्र समासांतोदात्तत्वमेव। तुल्यार्थेन इति। नौवयोधर्मविषमूलमूलसीतातुलाभ्यस्तार्यतुल्यप्राप्य इत्याद्युदात्तस्तुल्यश
ब्दः। सदृक्श्वेतः। सदृक्श्वेत इति। समानान्ययोश्चेति किन्नंतः। सदृक्शब्दो गतिकारकोपपदात्कृदिति
कृदुत्तरपदप्रकृतिस्वरेणांतोदात्तः। एवं सदृशशब्दः। कृअंतो मध्योदात्तः। कि[illegible]रिणेति। कृदृश्दृक्
टित्रिदिच्छिदिभ्य इत्यौणादिकः इः सप्रकित्। नुजे किदित्यतः किदित्यनुवर्त्तनात्। नेनकिरिगिरिशब्दौ प्रत्य
यस्वरेणांतोदात्तौ। मंदयत्सखमिति। मदिस्तुत्यादिषु णिजंतात् लटः शत्रादेशः। तस्य छंदस्युभयथेत्यार्द्ध
धातुकत्वात्। नशाबभावात्तास्यनुदात्तेङिदुपदेशादिति निघातो न। अतः प्रत्ययाद्युदात्तत्वमेव। णेरनिटि।

२२ तिणिजोपक्कनत्तमिति सार्वधातुकत्वाश्रयणात्। न चैवं परीत्यमापादनीयं छंदसि दृष्टानुविधानात्। इ
त्यंमंदेयच्छ प्रोतोदात्तः। शास्त्रीश्यामेति। उपमानानि सामान्यवचनैरिति समासः। शास्त्रीशब्दो गौरादिङी
षंतो तोदात्तः। अव्यये। निपातत्वादेव सिद्धे नञ्ग्रहणमकरणिरित्यादौ परस्यापि कृत्स्वरस्य बाधनार्थं।
अकरणिरित्यादौ वाक्रोशे नञ्यनिरित्यनिः। किंचातिस्त्र इत्यत्र तिस्त्र्योज स इति शिष्टोपि विभक्तिस्वरो नञ्स्व स नि ४
द्वौ ५ रेण बाध्यते। अपि च तत्त्वाः। अनश्वा ह इत्यत्र सति शिष्टोप्यास्तरो बाध्यते अत्र्यपीत्यत्र जिदद्रीत्यादिना
धातुना समासं निपात्य इतिः क्रियते तस्यापि स्वरस्य बाधनार्थं। कुग्रहणं चादिषु पाठात्तावात्। स्नात्वेति। मयूर
व्यंसकादिरयं। नन्वेवं मंत्रे वांतोदात्तत्वं निपात्यतामिति चेन्न। सामिकृतं स्वयंधौतमित्यादिवारणाय परिग
णनस्यावश्यकत्वात्। अन्यथा तत्रापि पूर्वपदप्रकृतिस्वरः स्यात्। इष्यते तु समासस्यैत्यंतोदात्तं। सामिकृत
मित्यादौ सामि स्वयं क्तेनेति समासः। मुहूर्त्तसुखमिति। कालाध्वनोरिति द्वितीया। अत्यंतसंयोगे चेति स
मासः। मुहूर्त्तशब्दः पृषोदरादिरंतोदात्तः। भोज्योष्णमिति। कृत्यतुल्याख्या इति समासः। भोज्यशब्दो ण्यदंत
ति स्वरितमिति। स्वरितांतः। वर्णो वर्णे। अत्र एव इति निषेधाद्बहुवचननिर्देशाच्च उत्तरपदे स्वरूपग्रह २३
णं नं तत्साहचर्यात्पूर्वपदेपि स्वरूपग्रहणं नं तदाह। वर्णवाचिनीत्यादि। कृष्णशब्दो नक्प्रत्ययांत इति। कृषे २२

र्णे इति विहितो योनक् नदंत इत्यर्थः। कृष्णशब्दः कृष्णस्यामृगाख्या चेदित्यंतोदात्तो वेदे। भाषायां तु
वर्णानां णतितिनितांतानामित्याद्युदात्तः। इ तन्नं त इति। रुहेरश्वलोपो वेति इतन्प्रत्ययांतो नित्स्वरेण
द्युदात्तः। कृष्णतिनाइति। वर्णो वर्णेनेति प्रतिपदोक्तः समास इह गृह्यते तेनेह न भवति इहे वर्णाश्चित्सप्रयोज
नं गाध। अरित्रगाधमिति। अरित्रं नौकाष्ठं तस्य गाधं स्पृश्यमानं तलं गाध्यत इति गाधः। गाधृ प्रतिष्ठा
यां कर्मणि घञ्। अर्धर्चादित्वात् क्लीबत्वं। गोस्तलवणमिति। षष्ठीसमासः। गोशब्दो गमेर्डोरिति डोप्रत्य
यांतोंतोदात्तः। इत्वांत इति। आर्त्तिजन्यस्त्वन सह चर इति विहितः। मध्योदात्त इति। प्रत्ययस्वरेण। इ
यत्तापरिच्छेदमात्रमिति। इयत्तायाः परिच्छित्तिरियत्तापरिच्छेदः। क्रियाशब्दोऽत्र प्रमाणशब्दो गृह्यते
न पुनरायाममात्रे रूढ इत्यर्थः। दायाद्यं। दानमादायेंशः दायमादत्ते दायादः। मूलविभुजादित्वात्कः। दा
द्वौ ४ यादस्य भावो दायाद्यं। दायस्यादानं तत्संबंधो वा। इकुलक्षणया अदीयमाने दाये च दायाद शब्दो
वर्तते। दायादशब्दे परे दायाद्ये च पूर्वपदं प्रकृतिस्वरं स्यात्। कृत्प्रत्ययांत इति। कृषुर्जिमंदिनिधाञः स्व० ५३
कुरिति विहितः। परमदायाद इति। अत्र समासांतोदात्तत्वमेव। प्रतिबंधि। कार्यसिद्धिं प्रतिबध्नातीति
प्रतिबंधि। आवश्यकेणिनिं। गमनचिरं व्याहरणक्षममिति। गमनव्याहरणशब्दौ ल्युडंतौ तयोर्लित्स्वरेणाद्य

८३ ८१

गमनशब्दस्य गतिवाचित्वात् । चिरशब्दस्य कालवाचित्वात् । नैष दोषः । चिर कालभाविनि गमने त्र चिरशब्दो वर्त्तते ।

त्र विशेषणसमासः । ननु सामानाधिकरण्येऽस्ति विशेषणसमासो भवति न चेह तदस्ति गमनमत्र विशे
ष्यं तद्विशेषणे तु चिरकृछ्रे तत्र विशेष्यस्य पूर्वनिपातार्थमपूर्वं यंसकादित्वमप्येष्टव्यं पूर्वपदस्य प्रतिबंधवाचित्वमु
पपादयति । गमनमित्यादि । कारणवैकल्याद्धि चिरकालभाविगमनं कार्यसिद्धेः प्रतिबंधो जायते । कृछ्रयोगि वा हृद्दु
दुःखं तद्योगि वा कार्यस्य सिद्धेः प्रतिबंधि जायते । मन्त्रकृछ्रमिति । षष्ठीसमासः । पदे । पदेशो । अपदेशो व्याजः । व्याजोऽप
देशो लक्ष्यं चेत्यमरात् । नदाहृ । व्याजवाचिनीति । उत्तरपदे नेति । उत्तारः पुरीषक्षेपो । विसृष्टपदमिति । षष्ठीसमा
सः । निवाते । निवातशब्दे परे वातत्राणवाचिनीति । वातत्राणार्थे निवातशब्दे परे इत्यर्थः । वातस्याभावो निवातमि
त्यव्ययीभावः । निरुद्धो वातोऽस्मिन्निति बहुव्रीहिर्वा तत्र कुट्यादयो वर्त्तमानाः समानाधिकरण्याः । निवातशब्देन समस्यं
ते । कुटी एव निवातं कुटीनिवातं कुड्यनिवातं । आगंतव इति । कर्तव्येऽर्थके । उकारस्येत्संज्ञा न भवति गुणप्रतिषेधात्क
ककारानुबंधात् । यत्त्वं न [illegible] इत्यन्य इति तेलुक भवतेर्वृन्निति सूत्रमधीयते । शारं तूत्तरनार्थं इति । अर्थः तूत्त
न इत्यर्थः । रज्जोः स्रस्तत्वं कृतमिति । रज्जुवद्धपात्रे रज्जुशब्दे इदानमिव कूपादुद्धृतं जलमित्यर्थः । सृजेरसुम्बे
ति । स्कंदे सृजोपदेशस्य तः सृजोपदेशि वर्त्तते । गान्धमशीत्युक्ति त्यं तः उरितिधान्येनिदिष्य तः निदिति । सूजे [illegible] स्यात्
सचनित्धातो रसुगागमः । सृजोपदेशस्यार्थः । तत्र सृजे रंत्याद्यचः । परेऽसुमि सृजोपयणादेशोऽसुम्सकारस्य

एव निवातं कुड्य

रुः २

जश्त्वे च रज्जुरिति भवति । आद्युदात्त इति । प्रत्ययस्य नित्वान्नित्स्वरेण । उत्तमशारदमिति । शारदिकृतो नवं शार
दं । अध्वा । कठाध्वर्युरिति । अध्वरं यज्ञं याति स अध्वर्युः जातिविशेषः । कठेन प्रोक्तं छंदोऽधीयते कठाः । कठशब्दादु
मं शिनि प्रत्ययः तस्य लुक् । अध्येत्रणकठप्रोक्ता छुगिति लुक् । विशेषसमासोयं । दौवारिककषाय इति । षष्ठी
समासः । सदृशा । सादृश्यवाचिनि तत्पुरुषे पूर्वपदं प्रकृत्या । एतयोरुत्तरपदयोः । पितृसदृश इति । पितृमा
मातृशब्दावृणादि तजंतौ । चित्स्वरेणांतोदात्तौ । नन्वन पूर्व सदृशसमोनार्थेति तृतीयासमासे कृते नेत
त्पुरुषे तुल्यार्थे स्वरसिद्धम् । न च तुल्यार्थयोगे षष्ठ्या अपि विहितत्वे न षष्ठीसमासार्थमिदमिति वाच्यं ।
तत्रानभिधानात् षष्ठीसमासो नेत्यपि सुवचत्वात् इति चेन्नैवं । अलुक्समासानुरोधेन षष्ठीसमास २
स्वीकारस्यावश्यकत्वात् । तद्यथा । दास्याः सदृशो वक्ष्याः सदृश इति षष्ठ्या आक्रोश इत्यलुक् । दासीशब्दो दंसेष्ट्रा
न्नाचेति दंसेष्टः प्रत्ययः नकारस्य चाकारः प्रत्ययस्वरेणदासशब्दोदात्तः । टित्वान्ङीप् यस्येति लोपः । अनुदा
त्तस्य च यत्रोदात्तलोप इति ङीप उदात्तत्वं । वृषलशब्दाज्जातिलक्षणो ङीष् । उभयत्राप्युदात्तयणो हल्पूर्वादि
ति विभक्तिरुदात्ता । नन्वेवं तृतीयासमासविधायके पूर्वसदृशेति सूत्रे सदृशग्रहणं मास्तु । सर्वत्र षष्ठीसमासो स्ये
ति चेन्नैवं । यत्र षष्ठ्यर्थो नास्ति तदर्थं सदृशग्रहणं । विद्यया सदृशो विद्यासदृश इति विद्यया हेतुना सदृश इति ।

अन्योदेवदत्तादिरत्रप्रतियोगी।प्राच्यशब्दस्याद्युदात्त इति।द्युप्रागपागुदक्प्रतीचो यदिति यदंतत्वाद्य
तोनावइत्याद्युदात्तः।परममहत्समिति।सप्तानां समानां समाहारः सप्तसमं समाहारद्विगुः।पात्रादित्वा
त्स्त्रीत्वाभावः।गंतव्यपण्यं वाणिजे वाणिजः।प्रज्ञादित्वादण्।मद्रवाणिज इति।मद्रेषु गत्वा व्यवहरतीत्यर्थः
गोवाणिज इति।गमेर्डोः।अंतोदात्तोयं सप्तमीसमास इति।सप्तमीति योगविभागात्।मद्रवाणिजेत्यत्र षष्ठी
तद्५ समासः।रक्प्रत्ययांतं इति।स्फायितंचीति विहितो रक्।तदंतमित्यर्थः।प्रत्ययस्वरेणांतोदात्तोयं।मात्रोपनयेति।पू
र्वपदं प्रकृतिस्वरं स्यादित्यर्थः।भिक्षाशब्दो अप्रत्ययांतोंतोदात्तः।मात्राशब्दस्तुल्यपर्यायो वृत्तिविषये तुल्यप्रमाणे
वर्तते भिक्षायास्तुल्यप्रमाणमित्यस्वपदविग्रहः षष्ठीतत्पुरुषः।तदाह।भिक्षाया इति।पाणिन्युपज्ञमिति। मि३
उपज्ञायत इत्युपज्ञा आतश्चोपसर्गे कर्मण्यङ्।पाणिनिशब्दः इञंतत्वादाद्युदात्तः।तस्य उपज्ञेति षष्ठीसमा
सः।उपज्ञोपक्रमं तदाद्याचिख्यासायामिति नपुंसकता।नंदोपक्रममिति।षष्ठीसमासः।अत्रापि पूर्ववन्नपुंसकता
उपक्रम्यत इति कर्मणि घञ्।नोदात्तोपदेशस्येति वृद्धिनिषेधः।इषुच्छायमिति।इषूणां छाया इति तत्पुरुषः।छा
या बाहुल्ये इति नपुंसकता।इषेः किच्चेत्युप्रत्ययांत इषुशब्दः।तत्र नित्यधिकारादाद्युदात्तस्तदाह।इषुशब्द इति। २४
गमनसुखमिति।समानाधिकरणसमासो मयूरव्यंसकादिर्वा [illegible] इति।गमनशब्दो ल्युडंतः लितीति स्वरेण

नो६

द्युदात्तः।प्रागुक्तमिति।सुखप्रिययोः परयोस्तत्पुरुषे पूर्वपदं प्रकृतिस्वरं स्यादित्यर्थः।योगविभागो यथासं
ख्यनिवृत्त्यर्थः।ननु सुखप्रिययोः इत्येतावत्सूत्रं कृत्वा हिते चेति वक्तव्यं तत्राह।सूत्रे सुखप्रिययोः हितेन प्री२
अभिचारादेव प्रीतौ गम्यमानायां न विष्यतीति चेन्न स्वल्पं प्रीतिग्रहणं नातिशयप्रतिपत्त्यर्थं।ब्राह्मणब्रा
तेति।ब्रह्मणोपत्यमित्यर्थे ब्राह्मणः।ब्राह्मोजाताविति निपातनात् टिलोपाभावे अन्निति प्रकृतिभावः।छात्रशब्दः छत्रादि
भ्योण इति णप्रत्ययांतः।पत्यावैश्वर्य इति पतिशब्दे परे पूर्वपदं प्रकृतिस्वरं स्यात् तत्पुरुषे।गृहपतिरिति।ष
ष्ठीसमासः।गेहे कः इति कप्रत्ययांतो गृहशब्दः प्रत्ययस्वरेणांतोदात्तः।[illegible]।त्वादीनां समाहारद्वंद्वे नपुंसक
त्वं ह्रस्वत्वं च।एतानीति।भ्राक्चित् दिधिषू एतानीत्यर्थः।न भ्राक्वेति।पूर्वेण प्राप्तः प्रतिषिध्यते।भ्रूपतिरित्या
दि।षष्ठीसमासा एते तत्र भाक्यन्नवयः क्विबंताः।दिधिषूशब्दो [illegible] इति ऊप्रत्य
यांतो निपातितः।सर्वे एवेंतोदात्ताः।वा भुवनमिति विषये इति।ऐश्वर्यवाचिनि पतिशब्दे परे भुवनशब्दः पूर्वपदं प्रकृति
त्या३ स्वरं स्यात्।पत्यावैश्वर्य इति प्राप्तस्य विकल्पोयं।भुवनपतिरिति।भुवनशब्दः क्युन्प्रत्ययांतो नित्स्वरेणाद्युदात्तः।आ
शंकाबाधः आशंकाबाधनेदीयस्सु नरपदेषु संभावनवाचिनि तत्पुरुषे पूर्वपदं प्रकृतिस्वरं स्यात्।शङ्किशंका कि२
यां बाधलोडने।आङ्पूर्वाभ्यां कर्मणि घञ्।अतिशयेनांतिकं नेदीयः।द्वयोरंतिकयोर्मध्ये एकस्यातिशयवि

वक्ष्यामिथसुनिच्श्चं तिकवाच्ययोरितिनिद्रादेशः। गमनाशंकाद्रियो विशेषणसमासः मयूरव्यंसकादयोवा। अस्ति
ताधमवसाय इति। अस्तित्वनिश्चयः। गमनाशंकमिति। पूर्वपदानि युस्युदंतानि। तत्रलिस्वरः। गमनमाशंसनऽस्य
दि। संभाव्यतऽत्यस्यप्रत्येकमन्वयः। गमनमाशंसतऽतिसंभाव्यते। गमनमाबाध्यतऽतिसंभाव्यते। गमनंनिकटत्वम्
तिवासंभाव्यते। पूर्वेभूतपूर्वः। भूतंपूर्वार्थेपूर्वशब्देपरेपूर्वपदंप्रकृतिस्वरंस्यात्। आढ्यो भूतपूर्वऽति। यःपूर्वमाढ्य
धू१ सीत्सएवमुच्यते। आढ्यचरऽति। अत्रविशेषणसमासः मयूरव्यंसकादिर्वा। आङ्शब्दः आङ्पूर्वान्ध्यायतेः
घञर्थेकविधानमितिकर्मणिकः। आंगेनोपः इत्योदरादित्वाद्धस्वः। थाथादिस्वरेणांतोदात्तः। परमपूर्वऽति। परम
श्वासोपूर्वश्चेतियोयंवाक्यार्थः प्रत्यमानतात्वन्गत्वमितिनिरूप्रत्मुदाहरणेसमासः परमश्वासो भूतपूर्वश्चेतिविग्र
हउदाहरणमेव। सविधसामीप्यार्थेषु सविधादिषूत्तरपदेषुप्रकृत्यात्पुरुषे मद्रसविधमिति। सर्वत्रोदाहरणेषष्ठी
समासः। मद्रराजेनोदात्तः। गांधारि। कर्दमादीनांचेत्याद्युदात्तोमध्योदात्तोवा। काश्मीरेलघावंतऽतिमध्योदात्तः।
सविधादीनांसरूविधया इत्येवमादिकाव्युत्पत्तिरेवकेवलंसमीपवाचिनत्वेनसमुदायाः मद्रादीनांसविधंसम ऽा२
मीपमित्यर्थः समर्यादमिति। सोपसर्जनस्येतिसरूस्यसादेशः वेत्रसमर्यादमिति। षष्ठीसमासः स्पशबाधनऽत्यस्य २५
र्शनयो रित्यस्यथ्वंतस्यनिष्ठायांवादांतशांतेतिस्पष्टशब्दोनिपातितः। तस्यविराबद्वगतिसमासः। विस्पष्टंकटु

१ पूर्वपदं५

१ सविधादिषुर्किं। मद्रसमीपं। विस्पष्टशुद्धीष्वबयनेषु
परेषु विस्पष्टादीनिपूर्वपदानिप्रकृत्यास्युः। विस्पष्ट
कटुकमिति २

न्या२

मितिविग्रहः। विस्पष्टादीनिशब्दप्रवृत्तिनिमित्तस्यविशेषणानिनत्रव्यस्यकटुकादिशब्दैर्गुणवद्द्रव्यमभिधीय
तऽतिसामानाधिकरण्याभावात्कर्मधारयाभावेसुप्सुपेतिसमासः। विचित्रैःसादिचित्रंचित्रीकरणंचुरादिण्यं
तद्धतादेरच्। विशेषेणचित्रंविचित्रंप्रादिसमासः। तत्पुरुषेतुल्यार्थेतिअव्ययपूर्वपदप्रकृतिस्वरेणाद्युदात्तः। चित्तं
संज्ञानेनिष्ठा। विगतंचित्तमस्येतिविचित्तं। बहुव्रीहोप्रकृत्यापूर्वपदमित्याद्युदात्तत्वं। अंजूव्यक्त्यादिषुतस्यविपूर्वस्य
निष्ठायांगतिस्वरेउदात्तस्वरितयोरितिस्वरितादिः। संपूर्वात्पदेःकर्त्तरिक्तः। थाथादिस्वरेणांतोदात्तः। गतिस्वरस्तुन
कर्मणीतिनप्रवर्त्तते। अयंकर्त्तरिक्तः। फलिपाटिनमिमनिजनांगुकपटिनाकिधतश्चेत्युप्रत्ययांतःपटुशब्दः। तत्रनिदित्य
धिकारादाद्युदात्तः। पडिगतोक्तः। प्रत्ययस्वरः। उणादिरत्नोलुपलव्यवहारेस्तुतोचजमंतादुः। पंडाबुद्धिःसास्यसंजा डु:१
तायस्येतितारकादिलादित्वच्। एवमुक्तंकुशान्ल्लातीतिकुशलः। आतोऽनुपसर्गेकऽतिकः कृत्स्वरेणांतोदात्तः। चुप
मंदायांगतौ। अस्माच्चुपेरच्चोपधायाऽतिकलप्रत्ययः। तत्रत्थादित्यश्चिदित्यनश्चितिनिवर्त्तनादंतोदात्तः पुणकर्म
णिशुभेऽनेऽगुपधज्ञाप्रीकिरःकः। थाथादिस्वरेणांतोदात्तः। अन्या अनुक्तनामादेशानामुत्तरपदत्वासंभवात्स
मर्थ्याचतउत्तरपदंगृह्यतेऽत्याह। इत्यादेशवतीति। इष्टेषसुनोःप्रशस्यस्यश्रःज्यचयुवाल्पयोःकनन्यतरस्यांग
मनुशेषमित्यादि। मयूरव्यंसकादित्वाद्राजदंतादित्वाद्वाविशेषणस्यपरनिपातः। पापि
ष्ठमिति। चिन्मतोर्लुक्। उदाहरणेनपुंसकेनावकांस्युक्तेतिभावेल्युट्। तदंतान्येतानिपूर्वपदानिलित्स्वरेणाद्युदात्ता

१ स्युःस्ये१

नि। गाम्यते ऽनेनेति। करणाधिकरणयोश्चेति करणे ल्युट्। केति किमिति। कर्मधारये इति किमर्थमित्यर्थः। कुमा
र्या। कुमारशब्दः पूर्वपदं प्रकृतिस्वरं स्यात्। कुमारश्रमणेति। कुमारी श्रमणी कुमारश्रमणा। कुमारः श्रमणादि
भिरिति समासः। लिंगविशिष्टपरिभाषया कुमारीशब्दस्य पुंसमासे पुंवद्भावः। अंतोदात्त इति। कुमारक्रीडायां।
पचाद्यच्। चित्स्वरः। अत्र कुमारश्रमणादिभिरित्यस्यैव ग्रहणं। प्रतिपदोक्तत्वात्। केचित्तु सर्वस्यैव कर्मधारयस्य
ग्रहणमिच्छंति। तथा च कुमारब्राह्मण इत्यत्र पूर्वपदप्रकृतिस्वरत्वं मतभेदेन भवति। आदिः। आदिरिति षष्ठ्यर्थे प्रथ
मा। पूर्वत्र कुमारशब्दस्य प्रकृतिभावेन यः स्वरः प्राप्तः। सो ऽत्रादेर्भवतीति सूत्रार्थः। एवं स्थिते फलितमाह। कुमार
स्यादिरुदात्तः स्यादिति। पूगेषु। गणवाचिनि उत्तरपदे कर्मधारये कुमारस्यादिरुदात्तो वा स्यात्। कुमारचातका इति।
चातकादयः पूगशब्दाः। तेभ्यः पूगाञ्ञ्योऽग्रामणीपूर्वादिति ञ्यः। तस्य तद्राजस्य बहुष्विति [illegible] लुक्। कुमारश्चे
त्येव भवतीति। तत्र प्रतिपदोक्तग्रहणपक्षे समासांतोदात्तत्वम्। पंचारत्निरिति। पंचारत्नयः प्रमाणमस्येति तद्धिता म५
र्थे द्विगुः। प्रमाणे लो द्विगोर्नित्यमिति मात्रचो लुक्। पंचसु कपालेषु संस्कृतः। पंचसु भगालेषु संस्कृतः। पंचसु शरावेषु सं
स्कृतः पंचकपालः। पंचभगालः। पंचशरावः। तद्धितार्थे द्विगुः। द्विगोर्लुगनपत्य इत्यणो लुक्। पंचाश्व इति। पंचभिरश्वैः
क्रीतः पंचाश्वः। आर्हीयष्ठक्। तस्य अध्यर्धेति लुक्। बहुशब्दः पूर्वपदं प्रकृतिस्वरं वा इगंतादिषूत्तरपदेषु परेषु द्वि २६
गौ पूर्वेण नित्ये प्राप्ते विकल्पः। बहुशब्दो ऽन्तोदात्त इति। वहिंहोर्नलोपश्चेति कुप्रत्ययः। प्रत्ययस्य २६

रत्नं नोदात्तः। पक्षे समासांतोदात्तत्वं। पूर्ववत् विग्रह प्रत्ययलुक् प्रत्युदाहरणानि योजनीयानि। दिष्टिः दिष्टिवित
स्ती प्रमाणेनेनात्र [illegible] मात्रचो लुक्। अत्रापि पक्षे अंतोदात्तत्वं बोध्यम्। सप्तमी। स्पांत इति। कुरुक्षेत्रादिषु संज्ञा
शादिभ्योऽण्यः। पूर्वांत इति। अक्षि गमिनमिहनिविशिपशां वृद्धिश्चेति ... संयोगादिलोपः। अश्चेति षत्वं नित्वादाद्युदा
त्तः। अंतोदात्त इति। कृञः कोऽपि चेति कप्रत्ययांतौ प्रत्ययस्वरेण। थाथादिस्वरेण वा बाधितः। सप्तमी स्वर इति। सि
द्धशुष्कपक्वानां क्तांतत्वात् बंधस्य घञंतत्वात् थाथादिस्वरेण न तु कृत्य तुल्यार्थेत्यादिना स प्राप्तं तस्य यः प्रकृतिभा
वः स परत्वाद्बाधितस्तेन पुनर्विधीयते। कचित्तु कृत्स्वरेण बाधित इति पाठः। तत्र कृदंतस्य यः स्वरः थाथादिलक्ष
णस्तेन [illegible] न्यर्थः। परि प्रत्यु। परि प्रति उप अप एते प्रकृत्या स्युः। परित्रिगर्त्तमिति। त्रिगर्त्तं वर्ज
यित्वेत्यर्थः। अपपरी वर्जन इति कर्मप्रवचनीयसंज्ञा। पंचम्यपाङ्परिभिरिति पंचमी। अपपरिबहिरंचवः पं
चम्येत्यव्ययीभावः। प्रति पूर्वाह्णमिति। अह्नः पूर्वो भागः पूर्वाह्णः। अह्नोऽह्न एतेभ्य इत्यह्नादेशः। अह्नोदंतादिति
टी४ णत्वं। पूर्वाह्णं प्रति। लक्षणेनाभिप्रती आभिमुख्ये इत्यव्ययीभावः। उपपूर्वाह्णमिति। पूर्वाह्णस्य समीपे अव्ययं वि
भक्तीत्यादिना सामीप्येऽव्ययीभावः। उपपूर्वरात्रमिति। रात्रेः पूर्वो भागः पूर्वरात्रः। अहः सर्वैकदेशेत्यच्। रात्राह्ना
हाः पुंसीति पुंस्त्वं। पूर्वरात्रस्य समीपम् उपपूर्वरात्रं। उपसर्गा आद्युदात्ता इत्याद्युदात्तानि पूर्वपदानि। सिद्धत्वादिति।
बहुव्रीहौ प्रकृत्या पूर्वपदं तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्या इत्यनेन। ननु किं पुनः कारणं

नदंतात्र्यजिञो ब्येतिफकः ।८ — वर्त्तमाना इति ।३

३० अपपर्योश्चरेव वर्त्तमान इत्युदाहृतो नेतरयोस्तत्राह । अपपर्योरिति । तेन त्रिगर्त्तं वर्ज्य विवक्षिते अपत्रिगर्त्तं प्र
ति त्रिगर्त्तमिति न भवति । नन्वपूर्वाह्णं पूर्वरात्रं च वर्ज्य विवक्षायामर्थे अपपूर्वाह्णं परिपूर्वाह्णं अपपूर्वरात्रं परिपूर्वरात्र
मिति । अहोरात्रावयवाः । अपपर्योः कस्मान्नोदाह्रियंत इत्याशंक्याह । अहोरात्रावयवा इति । वर्त्तमानग्रहणे
नैव सिद्धत्वान्न पृथगुदाहृता इत्यर्थः । वर्ज्येति किमिति । वर्त्तमाना अहोरात्रावयवेषु क्विं । अग्निं प्रतीति । लक्षणेनाभिप्र
३५ तीत्यव्ययीभावः । श्वाफल्कचैत्रकाइति । श्वफल्कचैत्रकाभ्यामपत्येऽण् । शिनिरापुदात्त इति । वृष्णिश्रियुधुकुलाहाव
रित्यो निर्दिनिस्त्रेणबाकुल्कालश्रीज्ञोपिनिः तस्यनित्त्वं कृत्स्वत्वं चेति द्वेष्या इति । पादनुसमुद्रंपञ्च । नैमेर
पत्यमिति । नीमस्यापत्यम् तङ्न्त्र । [illegible] । ननु चरा [illegible] पत्ये [illegible] मिति वचनाद् जन्यशब्दः क्षत्रि
यजातिवचनः । ततश्च द्वैप्य नैमायना इत्यपयुक्तं प्रत्युदाहरणं तेषामपि क्षत्रियत्वादत आह । राजन्यग्रहणमित्यादि ।
अंधकवृष्णीनां क्षत्रियत्वाभिचारात् । राजन्यग्रहणमुक्तविशेषपरिग्रहार्थमिति भावः । एकादशेति । संख्याया
अव्ययीस्याइत्येकशब्दस्य पूर्वनिपातः । आन्महत इत्यत्र आदिति योगविभागात् आगेकादशभ्य इति निर्देशाद्वा आ
त्वं । इएजीकापाशाब्यूतिमर्त्तिभिः कनितिनित्वाद्देकशब्दश्चाद्युदात्तः । द्वादशेति । घष्टनः संख्यायाम् इत्यात्वं । त्रयोदशेति
त्रेस्त्रय इति त्रयसादेशः । अंतोदात्तो निपात्यत इति । इदं काशिकानुरोधेनोक्तं । वस्तुतस्तु त्रयोदशा चमेद् इति स्वच्चा ३१
नुरोधादाद्युदात्तो निपात्यत इति बोध्यं । आचार्योपसर्जनो । आचार्य उपसर्जनं यस्य स आचार्योपसर्जनः ।

मेश्रापत्तं — इज्यस्त्रा गोत्रे यद् इत्र स्यात्तशेषाः २ — नदंतादृण्
३२

अंते वसतीत्यंतेवासी शयवासवासिषु कालादिति सप्तम्या अलुक् । सूत्रे षष्ठीबहुवचनस्य स्थाने प्रथमैक
वचनं तदाह । आचार्योपसर्जनांतेवासिनां द्वंद्व इति । पाणिनीयरौढीया इति । वृद्धाच्छः । रौढिशब्दादिञ्चेत्यल्लन्
न्यष्वचः प्राच्य भरतेष्विति निषेधात् । द्वंद्वविशेषणार्थमिति । ननु तंतेवासिविशेषणार्थं । तस्य आचार्योपसर्जनत्वा
तिचारात् । किमर्थं पुनर्द्वंद्वविशेषणं विज्ञायत इत्याह । सकलद्वंद्व इति । छांदसेति । छंदोधीत इत्यण् । श्रोत्रियं छंदोधी
त इति वुन् । तत्र चाग्रहणानुवृत्तेः । आपिशलपाणिनीयेति । आपिशलस्यापत्यमापिशालिः । आचार्यः । तेन प्रोक्त
मापिशलं इत्यश्वेत्सण् । पाणिनिना प्रोक्तं पाणिनीयं वृद्धाच्छः । आपिशलं च पाणिनीयं च आपिशलपाणिनीये । कार्त्त
कौजपाः । तत्र ग्रात्ताः कुजाः तान्यानीति कुजपाः । कृतकुजपाभ्यामपत्ये त्रण् । सावर्णि रितः । मांडूकेयशब्दो ढक् च मं
डूकादिति ढगन्तः । महाव्रीहिरिति । आन्महत इत्यात्वं । महैषास इत्यादीति । अत्र एकारः स्वरितो वानुदात्ते पदादौ वि
ति स्वरितो वा । आदिपदेन महाजाबालः । महानारः । महानारत इति महाहैलिहिलः । महारौरवः । महाप्रवृद्धः । महा
ह्रांतोदात्त इति । वर्त्तमाने पृषन्महदिति तत्र तथा निपातनात् । मन्महरिति । एतच्च लक्षणप्रतिपदोक्तपरिभाषया
स्यैतीननु प्रवृद्धग्रहणमनर्थकं कर्मधारये निष्ठेति वक्ष्यमाणेनैव सिद्धत्वात् । कृद्ग्रहणे गतिकारकपूर्वस्यापि
ग्रहणमिति प्रवृद्धशब्दस्य क्तांतत्वादिति चेन्न । कर्मधारयेऽनिष्ठेत्यत्रापि लक्षणप्रतिपदोक्तपरिभाषया क्तांतत्वप्र
तिपदोक्तो यः समासः श्रेण्यादि कृतेभिरिति ग्रहणं । हुक्कालादुक्कमस्य शेषः पूर्वपदप्रकृतिस्वरोस्तुः । केचिदेवरा

२८ परे। चुत्रमिति। आनो ऽनुपसर्गे कः। तोषी तिपरसवर्णः। उक्षः। उक्षः पूर्वपदं प्रकृतिस्वरं स्यात् वसादिषाम्योः परम् नः।
पुषेः ष्टुन्। उषदाते अस्मात् षुत्रिति वर्त्तमाने उषिरवनिभ्यां किदिति चुत्पादिनत्वात्। गोःसाद। गोशब्दः पूर्वप
६।३ दं प्रकृत्या सादिश्वन्तरपदेषु। गोसादइत्यादि। सदेर्घञ्। नदंतेनषष्ठीसमासः। अथवा गां सादयतीति गोसादः।
सदेर्ण्यंतात्कर्मण्यण्। तस्मादेव गिनिं। गोसादीतत्र सादसादिनोः कृत्स्वरस्यापवादः। सार्थौ समासस्वरस्य। कु
रु। इरुपल्पकं बआंताः। सप्तसमासाः। नत्रादिनो द्वयोः षष्ठ्याः सोत्रो लुक्। इतरेषां पंचानां षष्ठ्याः स्थाने प्रथमैकव
चनं तदाह। स्वामिति। दासी भारालामिति। बहुवचननिर्देशादाद्यर्थो नगम्यते तदाह। दासीभारादेरिति। कुरस
यां नइति। कृञोरुच्चेति चुत्पादिनत्वाव प्रत्ययस्वरेणांतोदात्तो नायम्। आद्युदात्तइति। हजीवर्ज्जने। इगुपधात्कि
षा।३ दितीनं तत्वात्। किषलुइगंताः नीं चष्णुषा मिसादिर्द्दिती योवो दात्तः। एवं कुरुरपि। रिक्तगुर्वादयस्तत्र कर्मधारयः।
अस्तरनरली अश्लीलदृढरूपेति। अस्त तामली जशा वोनात् समासत्वादाद्युदात्तो। श्रीर्यस्यास्तीति। श्रीशब्दोल
वणपवचनः कपिलकादित्वात् लत्वमिति। रुपोरा लइत्यत्र कपिलकादीनामुपसंख्यानाल्लत्वं। जावल्लरदिता
स्या।३ पिकुकुत्लादीनाम भावात्संख्यानमात्रे णटठत्यर्थः। पारेवडवेति। पारेमध्येइत्यव्ययीभावस्तावन्। तथासति स्व
रेदीर्घनिर्देशो ऽयुक्तः स्यात्। वडवायाः पारस्यास्तं नवाद्रे। तितिलिनोपत्यमिति। तिलाः संत्यस्मिन्निति तितिली। तिल २८
शब्दान्मत्वर्थीयइनिः पृषोदरादित्वादिशब्दस्य द्वित्वं। अत्रयदा ऽपत्ये ऽण् तदा नस्तद्धितइति टिलोपः। यदातु

नृति १

छात्रेतदानी मिनण्नपत्यइति प्रत्ययति भावेप्राप्तेनांतस्य टिलोपे सप्रत्ययारीत्यनेन टिलोपः। पत्य
शब्दइति। अवद्यपण्येति दंतोनोनावइत्याद्युदात्तः। संज्ञायामिति। नियत प्रमाणकस्य नियतमल्पस्यकं
बलस्यैषासंज्ञा। समासांतोदात्तत्वमेवेति। ननु पण्यशब्दस्य कृत्प्रत्ययांतत्वात् तत्पुरुषेतुल्यार्थेत्यादिनाद्य त्या।३
६।४ र्वपदप्रकृतिस्वरेणनाम्यमत आह। प्रतिपदोक्तेति। कृत्यतुल्याख्याअज्यात्येतिपः कृत्यसमासः प्रतिपदो
स्वरः।५ क्तस्तत्रैवसः। अयंतु विशेषणं विशेष्येणेति सामान्यलक्षणविहितः केवलशब्दस्याजातिवचनत्वात् नचक्रत्वतु
ल्याख्या अजात्यात्यस्य वैयर्थ्यशंकयं। तद्धि गुणक्रियावाचिनोरनियमेन पूर्वनिपातप्रसंगे कृत्यांतस्य पूर्वनिपा ता॰
र्थवचनं नतु जातिनिषेधार्थं अजात्येतिवचनं न्यायसिद्धार्थानुवादएवेति स्थितं। दासीभारइति। दंसेर्टेन
आचेतिटः। टित्वान्ङीप्। उदात्तनिवृत्तिस्वरेणदासीशब्दः अंतोदात्तः। देवहूतिरिति। देवः पचाद्यजंतः। स्य
स्येत्यौ तत्पुरुषे ऽसमादि। एतेन दासीभारादेराकृतिगणत्वं दर्शितं। चतुर्थी। तस्मै इदंतदर्थं तत्र च तदर्थेन चतुर्थ्यं
तस्यार्थं उच्यते तदाह। चतुर्थ्यंतार्थायेदिति। यूपदार्विति। निदिल्दिदीर्घश्चेति वर्त्तमाने कुयुभ्यां चेति पः।
नित्वादाद्युदात्तयूपशब्दः। देवार्यमिति। देवः पचाद्यजंतः। गोहितमिति। चतुर्थी चाशिष्येत्यादिना चतुर्थी।
आद्युदात्तइति। श्रिञ्सेवायां बहिश्रिश्रुयुद्रुह्वाहात्वरिभ्यो निदिति निप्रत्ययस्य नित्वादाद्युदात्तः श्रग
शब्दइति। मुद्गियोर्गग्गौ बाकुलकात्पूर्वोपिशकालीनाहृतमिति। क्तेन नञ्विशिष्टेनानञिति समासः अनि

गो १ श्रि २

स्वरो विधीयते। गतिसंज्ञा च धातुमात्रमपेक्षते सा च प्रत्ययविशिष्टस्यैव प्रयोगार्हः। धातोश्च द्वये प्रत्ययाक्षिप्ते उकृत अत्र तत्र तिङंते २

कौ॰ स्वर॰ टी॰
सुबोधिनी
३०

ना६३

लुक्। प्रनताविति क्विन्नयं। प्रजग्ध्याक इति। अनिदितकृदृलुक्टुंङः पाकन्। आगंतुरिति। सितनिगमिमसिसच्यविधा
ञ्कृधिज्यस्तुन्। ननु कृतीत्यर्थो न घाटि। गतेरपूर्वपदासंभवात्कृदंत एवं भविष्यतीति चेत्सत्यम्। कृद्
ग्रहणं कृत्संज्ञाप्रवृत्तिकालोपलक्षणार्थं तेन कृदुपदेशे तादित्वाभावात्प्रत्ययमिति सादिसिध्यति। स्वरप्रवृत्तिवेलायां
तादित्वाभावेपि पूर्वं तत्सत्त्वात्। आदिग्रहणं शक्यमकर्तुं यस्मिन्विधिरित्येव सिद्धेः। तवैवं। अंतउदात्त इति। कथं
पुनरंतरेणोदात्तग्रहणमुदात्तो भवति सचोदात्त एवेति। युगपद्ग्रहणं त्ययमर्थो लभ्यते। अरुणं भवतीति वर्तते। त सत्ये ४
त्रैवमभिसंबंधः क्रियते। तवै प्रत्ययांतस्य प्रकृत्याश्रयः स्वरः प्राप्तः सोंत्यस्य भवतीति स चोदात्त एवेति। युगपद्
ग्रहणं पर्यायनिवृत्त्यर्थम्। अन्वेतवा इति। उपसर्गाश्चाभिवर्जमित्यनुरायुदात्तः। अनिगंतेंचतौ। परांच इति।
। अनिगित्यादिना क्विन्। स च वकारमात्रं ककारादीनामनुबंधत्वात्। उगिदचामिति नुम्। पराशब्द आद्यु
दात्तः। प्रत्यंच इति। अड्डत्तरपदप्रकृतिस्वरः। परत्वादिति। चुस्वरस्यावकाशः दधीचः। यत्र गतिर्नास्ति अ
निगंतस्वरस्यावकाशः पराचः पराच इत्यादावुभयप्रसंगे परत्वादनिगंतस्वर एव भवति। न चायं युक्तोवि
प्रतिषेधः। चुस्वरः सति शिष्टः। नसंज्ञायामग्लोपे च कृते प्राप्तत्वात्। सत्यं। नायं विप्रतिषेधः। किंतर्हि इष्टिरेवाचो
रनिगंतोंचतावप्रत्यय इत्येव स्वर इष्यते इति हरदत्तः। इहापि मूले परत्वादित्यस्येष्टत्वादित्यर्थः। न्य ३०
धीच। अत्रापि चुस्वरशदस्यमेव। कृत्स्वरापवादो योगो। ईषदन्य। ईषत्शब्दः पूर्वपदं प्रकृतिस्वरं वा स्यात्। अंतो
~~यमर्थो लभ्यते। अरुणं भवतीति वर्तते। तत्रैवमभिसंबंधः क्रियते। तवै प्रत्ययांतस्य प्रकृत्याश्रयः स्वरः प्राप्तः सोंत्य~~
~~स्य भवतीति~~ ४

दात्त इति। त्रिंशत्स्वरेण न दत्त्वा व समासांतोदात्तत्वं। ईषद्भेद इति। ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु
खल्। कृत्स्वर एव भवतीति परत्वात्। अथवा ईषद्गुणवचनेनेति प्रतिपदोक्तसमासग्रहणात् उप
पदसमासेऽस्याप्रवृत्तिरिति। द्विसुवर्णे इति। पंचकृष्णलकोमाषस्ते सुवर्णस्तु षोडश। पलं सुवर्णा
श्चत्वार इति। द्विसुवर्णमिति। पश्चात्समासस्वरः। बहुव्रीहावपीति। अत्र तत्पुरुषाधिकाराभावात्। प्रथ
मो अचिरोपसंपत्तिरचिरोपसंश्लेषः अभिनवत्वमित्यर्थस्तदाह। अभिनवत्व इति। अचीति किमिति
। अचिरोपसंपत्ताविति किमर्थमित्यर्थः। प्रथमवैयाकरण इति। वैयाकरणानामाद्यः मुख्यो वायः प्र
थमवैयाकरणशब्दः स नित्यमंतोदात्त एव कतरे। एतौ पूर्वपदभूतौ कर्मधारये प्रकृतिस्वरौ वा स्यातां।
कतरकतमौ इतमर इतमयो श्चित्वादंतोदात्तौ इहत्वित्यादि। कतरकतमौ जातिपरिप्रश्न इति पदेयं
समासस्तस्यैव ग्रहणं स च कर्मधारय एव तस्मात्केवलं कर्मधारयग्रहणमिति भावः। आर्यो ब्राह्मण आर्य
कुमारयोः उत्तरपदयोरार्यः पूर्वपदं प्रकृतिस्वरं वा स्यात्। कर्मधारये। स्वरितांत इति। तित्स्वरितमित्यने
न। आर्ये इति किमिति। ब्राह्मणकुमारयोरिति किमर्थमित्यर्थः। राजब्राह्मण इति। राजशब्दो ब्राह्मणेनाद्यर्या
द्यर्थ इति सामानाधिकरण्यात्कर्मधारयः। राजशब्दः कनिन्प्रत्ययांतत्वादाद्युदात्तः। उत्तरार्य इति
उत्तरो विधिः राजशब्दस्यैव यथास्यादार्यशब्दस्य माभूत्। यथासंख्यं। नातो विपृथग्योगकरणस्य प्रयो

प्रतिपदोक्तोपः

श्रीः

कौ० स्वर० टी०
सुबोधिनी
३१

ज्ञनं ज्ञेयं। राजप्रत्येनाइति। प्रतिगतमेनः पापं यस्य प्रत्येनाः। राज्ञः प्रत्येनाः। राजप्रत्येनाः। अन्यत्रेनेति। राजायां
सोमसोमप्रत्येनाः राजप्रत्येनाइत्यत्र। द्वितीयासमासोयमिति। द्वितीया पुनरत्यंतसंयोगे। अथवाः कर्मक
धातुनियोगे देशः काले नावो गंतव्यो ध्वा च कर्मसंज्ञक इति वाच्यं। ●। त्यवंतइति। त्यव्र्वेश्र्वेइति स्त्रियां मुक्ता
प्रकृसितइति। थाथादिस्वरः। समासस्वरस्य द्वितीयापूर्वपदप्रकृतिस्वरो बाधकस्तस्य थाथादिस्वरस्तस्यापि
प्रातिपदिकोपवादोयं। ग्रामः। ग्रामइति स्वरूपग्रहणं शिल्पिन्पर्यग्रहणं ग्रामशब्दः पूर्वपदं प्रकृतिस्वरं वा
स्यात् शिल्पिवाचिन्युत्तरपदे। ग्रामनापितइति। षष्ठीसमासः। आद्युदात्तइति। ग्रसेरा चेति मन्। नित्वादा
द्युदात्तः। राजनापितइति। कर्मधारये राजगुणाध्यारोपेणोत्तरपदार्थस्य प्रशंसा। षष्ठीसमासे च राजयोग्य
त्वात्तस्य प्रशंसा। सद्धिकर्मणि प्रवीणत्वाद्राज्ञां नं प्रतियोग्यो भवति। राजार्थमित्युक्ते प्रशंसा गम्यते। आदि
रुदात्तः पूर्वपदमित्यस्येत्यर्थत्वात्षष्ठ्याविपरिणामः। सर्वत्र चात्र प्रकरणे पूर्वपदविषयेषष्ठ्यर्थे प्रथमा। सप्त
मी। हारीत्या वश्पकेतिनिः। जनपदे ग्रामे कुले वा परंपरायातः सदाचारो धर्मस्तस्मादनपेतंधर्म्यं। धर्मपथ्यर्थ
न्यादिनायन्। तेन धाप्राप्यमित्यर्थेनौवयोधर्मेत्यादिनायत्। आचारवशादवश्यं कर्तव्यमित्यर्थः। हारिरुदाह
रणान्याह। याज्ञिकाश्वइति। षष्ठीसमासः। कर्मकरवर्द्धितकइति। वर्द्धितो नाम मूलेस्थस्तोऽग्रे सत्त्वम् ओदनपि ३१
ण्डः सकर्मकराय दीयते। अन्यथा कर्म न कुर्यादिति। न त्वयं धर्मः। वाडवहरणमिति। क्वचिदयमाचारः। बीजनि

नो १

षेकानंतरं वाडवायशरीरपुष्ट्यर्थं योग्यमश्वादिर्दातव्यं यद्दीयते तद्वाडवहरणमित्युच्यते। अत्रास्मि
६२ न्नुत्तरे निमित्तस्वरे प्राप्ते नो भावकर्मवचन इत्युत्तरपदांतोदात्तत्वं। ननु परत्वादेवायं स्वरो भविष्य
ति किं प्रतिषेधेनेत्यत आह। परोपीति। युक्तवाचिनीति युक्तः कर्मण्येतत्परः। तद्वाचिनीत्यर्थः। गोवल्लवः। व
ल्लवादयः शब्दागवादीनां पालकवचनाः। विभाषा। अध्यक्षशब्दे परे पूर्वपदमाद्युदात्तं वा स्यात्। अध्य
क्षशब्दोपि समासे युक्तवाच्येवेति पूर्वेण नित्ये प्राप्ते विकल्पः। पापं पापइति स्वरूपग्रहणं शिल्पिनीत्यर्थग्र ण्णि
हणं व्याख्यानात्। शिल्पिवाचिनि परे पापशब्दः पूर्वपदमाद्युदात्तं वा स्यात्। गोत्रांतेवासि। गोत्रवाचिनि। शिनि
अंतेवासिनि चोत्तरपदे माणवब्राह्मणयोश्च परतः क्षेपवाचिनी समासे पूर्वपदमाद्युदात्तं स्यात्। भार्यासौ
सु४ श्रुतइति। संस्थलोतीति सुश्रुतस्तस्यापत्यं सौश्रुतः। भार्याप्रधानतयेति। भार्याप्रधानः सौश्रुतइति शा
कपार्थिवादित्वादुत्तरपदलोपी समासइति दर्शयति। दक्षेण प्रोक्तं दाक्षं तदधीते दाक्षः। कुमार्यादि
लाभकामइति। तस्मिन्नेवग्रंथे श्रद्धायामसत्यामपि कुमार्यादिलाभकामः संस्तत्र प्रवर्तते तत एवं क्षिप
ते पूर्ववत्समासः। भयब्राह्मणइति। तृतीयेति योगविभागात्समासः। यो ब्राह्मणः सन् राजदंडादि

पूर्वपदमाद्युदात्तं स्यात्तत्पर्येषूत्तरपदेषु। अत्र बहुवचननिर्देशादेव स्वरूपविधिनिरासे सिद्धे आरभ्यमाणं तत्पर्यविशेषु वा

३२ न येन ब्राह्मणाचारं करोति स एवमुच्यते। अंगानि। अंगमारं तकं। बहुवचनं स्वरूपविधिनिरासार्थं। मैयश
ब्दे उत्तरपदे तदर्थारंजकवाचीनि पूर्वपदान्याद्युदात्तानि स्युः। मधविशेष इति। सुराव्यतिरिक्तं मैरे
यमित्यर्थः। भक्ताख्या। अन्नवाचिनां भिस्सादीनां ग्रहणार्थं। अन्यथा पर्यायाणामेवाऽन्नादीनां ग्रहणं स्यात्। भि
स्साकंसादयः। षष्ठीसमासाः। तादर्थ्ये चतुर्थीसमासस्तु न भवति। प्रकृतिविकारभावे एव तस्येष्टत्वात्। वक्रु
श्रीहिरिति। तत्पुरुष एवेदं तेनोदाहृतः। गोबिडालौ। उपमानशब्दे प्रत्येकं संबंधादेकवचनं गवादिषूपमानवाचिषू
त्तरपदेषु पूर्वपदमाद्युदात्तं स्यात्। धान्यगव इति। अत्रोपमितसमासे गोरतद्धितलुकीति टच्। अत्र पूर्वपदा
द्युदात्तविधानसामर्थ्याट्टच्स्वित्स्वरो बाध्यते। उपमानार्थो योयत्रोदाहरणे संभवति स तथा योजयित
व्यः। तत्र दिङ्मात्रं दर्शयति। गवाकृत्येत्यादि। आकृतिः संस्थानं। सन्निवेशितं व्यवस्थापितं। एवमन्यत्रापि यत्किं
चित्सादृश्यं योजयितव्यं। अके। जीविकार्थवाचिनि समासे अकप्रत्ययान्ते उत्तरपदे पूर्वपदमाद्युदात्तं स्यात्। दं
तलेखक इति। ण्वुल् तत्राविति ण्वुल्। प्राचां क्रीडायां। प्राचां क्रीडायामिति श्रुतयोरेवान्वयसंभवान्नेत्यध्याहा
रो न युज्यते इति तत्राह। प्राग्देशवर्तिनां या क्रीडेति। अजीविकार्थमिदम्। उद्दालकपुष्पभंजिकेति। नित्यं क्री ३२

डेति समासः। अनि नियुक्ते। युजिर् योगे इत्यस्य नियुक्त इति रूपम्। नियुक्तः अधिकृतः। स च कस्मिं
श्चित्कर्तव्ये तत्परो न भवतीति युक्त इत्यनेन न सिध्यति। युक्त इति सूत्रे हि युज समाधौ [illegible] दिवादिरात्मने
पदी। स्वरितेस्समाधिस्तत्परता। अत्र रोधादिकस्य स्वरितेतो ग्रहणं। योगः संबंधमात्रम्। छत्रधार इति।
कर्मण्यण्। [illegible]। शिल्पिनि। युक्ते चेत्येव सिद्धे कृञः प्रतिषेधार्थं वचनम्। तंतुवाय इति। कावामश्चेत्यण्। आ
त्तो युक्। संज्ञायाम्। संज्ञायां विषयेऽणन्ते उत्तरपदे पूर्वपदमाद्युदात्तं स्यात्। सत्त्वेदाण् कृञो न भवति।
गोमंति। गो तंतियवशब्दा आद्युदात्ताः स्युः पालशब्दे परे। गोपाल इति। गां पालयतीति विग्रहः। तंतिपा
ल इति। तनु विस्तारे क्तिन्। तंतिः वत्सानां बंधनरज्जुः। णिनि। णिनंते उत्तरपदे पूर्वपदमाद्युदात्तं स्यात्।
उपमानं। उष्ट्रक्रोशीत्यादि। कर्त्तर्युपमान इति णिनिः। शब्दार्थकृतौ किमिति। सूत्रं किमर्थमित्यर्थः। हू २५
कवं चेति। कृत्स्वरे [illegible] एवं न भवति। प्रकृतिरेवेत्यादि। असति प्रकृतिग्रहणे शब्दार्थात्परो यो णिनिस्तदंते
उत्तरपदे इत्यर्थो विज्ञायेत। तथा च यत्रापि धातूपसर्गसमुदायाच्छब्दार्थात्परो णिनिस्तत्रापि स्यात्। कृ
द्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणमिति परिभाषया णिनंतोत्तरपदत्वानपायात्। प्रकृतिग्रहणे तु न भ
वति। यो न धातुर्नासौ शब्दार्थः। यश्च शब्दार्थो धातूपसर्गसमुदायो न ततो णिनिर्विहित इति भावः। एवं किं।

कौ० स्वर० टी०
सुबोधिनी॥
३२

तेन पुष्प...इत्यादौ आद्युदात्तः १

नीर

शब्दार्थप्रवृत्तौ उपमानमेवेत्येव नियमो मा भूत्। युक्तारोह्या। युक्तारोह्यादयः समासा आद्युदात्ताः स्युः॥
युक्तारोही इत्यादि। अत्रालिंगीत्येव सिद्धे पूर्वोत्तरपदनियमार्थं सूत्रं यत्र युक्तादीन्येव पूर्वपदानि आ
रोह्यादीन्येवोत्तरपदानि तत्रैव यथा स्यादित्यर्थः। क्षीरहोतेति। याजकादित्वात् षष्ठीसमासोऽयं समा
सस्वरापवादे कृत्स्वरे प्राप्ते तदपवादे मन्क्तिन्निति तदपवादोऽयम्। दीर्घकाश। दीर्घान्तं पूर्वपदं
काशादीनि च पूर्वपदान्याद्युदात्तानि स्युर्जे उत्तरपदे। कुटीजः इति। सप्तम्यां जनेर्डः। उपसरजः इ
ति। स्त्रीगवीषु पुंगवानां गर्भाधानाय प्रथममुपसरणमुपसरः। प्रजने सर्तेरित्यप्। तत्र जात उप
सरजः। आमलकीजः इति। दीर्घकाशेति बाधित्वा परत्वादयं स्वरः। ...पूर्वपदान्यान्युदात्तानि
स्युः। मेधविशेष इति। सुसम्पन्नमित्यर्थः। ...
ग्रामे। स्त्रे निवसत्यस्मिन्निति पूर्वाद्वसेः... निवसि... वदि...
८।२ ग्रामः इति। षष्ठीसमासः। ...ग्राम इति। ... निवसंत्यस्मिन्नस्मा एवमुच्यते। घोषा। घोषादिषूत्त
रपदेषु पूर्वमाद्युदात्तं स्यात्। अत्र निर्वसंत इति केचिदनुवर्त्तयंति अपरे नानुवर्त्तयंति तथा च दा ३३
क्षीणां घोषो निवासस्थानमित्यर्थे दाक्षिघोषशब्दे आद्युदात्तत्वं न भवति मतांतरे भवति। छात्र्यादयः।

तृन् ४

शालायाम्। शब्दे परे छात्र्यादय आद्युदात्ताः स्युः। यदा शालांतत्वादि विभाषेनासुरेत्यादिनी शालांतस्य
४२ तत्पुरुषस्य विभाषा नपुंसकत्वमुक्तं। तत्र अस्यावकाशो यो नपुंसकलिंगो न भवति छात्रिशाला त
त्पुरुषे शालायामित्यस्यावकाशो यश्छात्र्यादिपूर्वो न भवति प्रभुशालं तत्र त्रियशालं यस्तु छात्र्यादि
पूर्वपदो नपुंसकलिंगश्च तत्र एकदेशविकृतस्यानन्यत्वादयमपि प्राप्नोतीति तत्पुरुषे शालायामित्ययं
च। तत्र पूर्वविप्रतिषेधादयमेव भवतीति वामनहरदत्तौ। प्रस्थे मालादीनां चेति वचनाद् वृद्धमिति
छेदः। कर्क्यादिप्रतिषेधस्तु नामधेयार्थः स्यात्। वा नामधेयस्य वृद्धसंज्ञा वक्तव्येति। अकेति किमिति। अ
कर्क्यादीनां किमित्यर्थः। माला। प्रस्थे परे मालादीनामादिरुदात्तः स्यात्। शोणप्रस्थ इति। एङ् प्राचां देशे इ
ति शोणशब्दस्य वृद्धत्वं। अमहन्नवं... महन्नव वर्जितं पूर्वपदमिति महद्वर्जितं नववर्जितं ... वर्जितं
चेति प्रत्येकं संबंधः। महानगरमिति। आन्महतः समानाधिकरणे इति महत आत्वे कृते अवर्णांतत्वादस्ति प्राप्तिः
। नवनगरमिति। नवशब्दः प्रत्ययवर्जनोऽकारांतः संघातविग्रहीतार्थमिति। महच्छब्दस्य केवलस्य महन्नगर
शब्दस्य संघातस्य च प्रतिषेधार्थः। महानगरमिति। अनेन स्मायः सरसां जातिसंज्ञयोरिति समासांते कृ टीयिर
ते सत्यवर्णांतमेतत्। तदेवं महन्नगरं महानगरमिति द्वेवोदाहरणे। प्राये त्वस्मान्नगरमिति तृतीयमप्युदा

कौ०स्वर०टी०
सुबोधिनी।।

३४ ग्रहणंपश्यते तदुक्त्यनुरोधादुक्तं। अश्मशब्दस्याऽनकारांतत्वात्। नच नलोपे कृतेऽवर्णांतत्वं। स्वरविधौ
नलोपस्यासिद्धत्वात्। अपरे तु मन्नाश्मग्रहणं संघातविगृहीतार्थमित्यस्य भाष्येऽदर्शनादसंगतमेत
दित्याहुः। दिवोदासायेति। दिवश्च दासे इति षष्ठ्या अलुक्। अंतः। अत्रापि प्रकरणात्पूर्वपद विषयात्र
षष्ठ्यर्थे वेदितव्या। सर्वगुणा। गुणकार्त्स्न्ये वर्त्तमानः सर्वशब्दोंतोदात्तः। यत्र गुणांतरस्याभावस्तत्र
गुणकार्त्स्न्यं भवति। सर्वश्वेत इति। पूर्वकालैकेत्यादिना कर्मधारयः। अत्र शौक्ल्येन गुणेन सर्वावयवानां व्याप्ति-
सै।६ र्गम्यते। आश्रयव्याप्त्येति न तु ज्वलत्वेन सर्ववर्ण इति विकारविषयमत्र कार्त्स्न्यं। सर्वश्वेत इति। गुणांत
रेण तरलोपश्चेति समासः तरप्प्रत्ययलोपश्च। कार्त्स्न्ये किमिति। गुणवाचिन्युत्तरपदे सर्वशब्दस्तत्का
र्त्स्न्ये न व्यभिचरतीति प्रश्नः। अयं नियमः कर्मधारये न षष्ठीसमासे इत्याह। सर्वेषामिति। गुणका
र्त्स्न्ये वर्त्तमानो न गुणकार्त्स्न्ये। सर्वेषामिति। गुणसंबंधषष्ठी। पटस्य शौक्ल्यमितिवद्गुणवाचिनस्तरप्प्रत्य
यः सर्वेषां पटानां द्रव्यांतराधारश्वेतगुणापेक्षया सातिशयः। श्वेतो गुण इत्यर्थः। यदा तु प्रतिपदोक्त
त्वात्पूर्वकालैकेति समासो गृह्यते तदा कार्त्स्न्यग्रहणं मास्तु। अंजनागिरिरिति। वनगिर्योः संज्ञा
यामिति दीर्घः। कुमार्यां। कुमारीशब्दे परे पूर्वपदमंतोदात्तं स्याद्वयसि द्योत्ये। वृद्धकुमारीति। विशेष ३४

णसमासः पुंवत्कर्मधारयेति पुंवद्भावः। ननु कुमारीशब्दः प्रथमे वयसि वर्त्तते तथा च वयसि प्रथ
डी।२ म इत्यनेन ङीप् विहितः तस्य कथं चरमवयोवाचिना वृद्धेन सामानाधिकरण्यमत आह। कु
मारीत्यादि। कुमारीशब्दे द्वयं प्रवृत्तिनिमित्तं प्रथमं वयः पुंसा सहासंप्रयोगश्च। तत्राद्यमर्थं त्य
क्त्वा द्वितीयमात्रे वर्त्तते तदा वृद्धादिसामानाधिकरण्यं भवति। तच्चेति। शब्दांतराभिधेयमित्यर्थः।
न कुमारत्वमेवेति। यदेतत्कुमारीशब्दस्य प्रवृत्तिनिमित्तं तद्द्वयं न गृह्यत इत्यर्थः। एतच्च वयोग्रहण
सामर्थ्याल्लभ्यते। अन्यथा कुमारीशब्दप्रयोगे नियोगतः प्रथमं वयो गम्यत इत्यनर्थकं तत्स्यात्। न
नु तर्हि ङीबपि न स्यादिति चेन्न। श्रवणात्। पूर्वं हि प्रथमं वयः प्रवृत्तिनिमित्तं कृत्वा ङीप् कृतः सोंतरंगो वृद्धा
दिना सामानाधिकरण्येपि न निवर्त्तते। परमकुमारीति। अत्र कुमारत्वमेव गम्यते न वयोंतरमिति भवति
प्रत्युदाहरणं। उदके। अकेवले इति पदच्छेदः। अन्यथा संदेहार्थं केवलउदके इत्येव ब्रूयात् तदाह।
अकेवलं मिश्रमिति। द्रव्यांतरसंपृक्तं मिश्रं गुडोदकमिति। गुडमिश्रमुदकं गुडोदकं। शीतोदकमिति कर्म
त्रि।२ धारयः। गर्गत्रिरात्रमिति षष्ठीसमासः। तिसृणां रात्रीणां समाहारस्त्रिरात्रं। अहःसर्वैकदेशेत्यादिनाच् स
मासांतः। संख्याव्ययादेरिति ङीबिति क्लीबत्वं एवं सप्तरात्रं। अतिरात्र इति। रात्रिमतिक्रांत इति प्रादिसमा

श्री।२

३५ सः। बिल्वसप्तरात्रमित्यत्र बिल्वशब्दो बिल्वहोमे वर्त्तते तेन षष्ठीसमासः। गोपालसभमिति। अशालाचेति
क्लीबत्वं प्रतिपदोक्तेति। समाराजेत्यादिविहितं रमणीयसभमिति। रमणीयास्सभायस्येति बहुव्रीहिः॥
अत्राभिधेयवशान्नपुंसकत्वं न प्रतिपदोक्तं। पुरे प्राचां पुरशब्दे परे प्राचां देशे पूर्वपदमंतोदात्तं स्यात्। अरि
कि० ष्टपुरं पूर्वग्रहणमिति। अरिष्टगौडयोरिति वक्तव्यमिति प्रश्नः। इहापि यथा स्यादिति। पूर्वग्रहणे सति बहु ६४
व्रीहिर्लभ्यते। अरिष्टगौडपूर्वे यस्मिन्समास इति तेनारिष्टाश्रित पुरं गौडभृत्यपुरमित्यत्रापि पूर्वपद
मंतोदात्तं भवति अस्मिस्तु पूर्वग्रहणे श्रितन्त्यशब्दान्तत्वं व्यवहितत्वाद् अरिष्टगौडयोस्तावन्तं स्यात्
समुदाययोऽश्वस्तत्रेऽनुपात्तत्वात्। नेति। पुरे प्राचामिति प्राप्तः प्रतिविध्यते। मार्द्देयपुरमिति। हलोपोक
ड्वा इत्युकारलोपः। दिक्शब्दा। दिक्शब्दाः पूर्वपदानि अंतोदात्तानि स्युर्ग्रामादिष्त्तरपदेषु चानराटेस्व
रूपग्रहणं। इतरेषामर्थग्रहणं। पूर्वेषुकामशमी। अपरकृष्णमृत्तिकेति। दिक्संख्ये संज्ञायामिति समा
सः। पूर्वपंचाला इति। समुदायेषु हि वृत्ताः शब्दा अवयवेष्वपि वर्त्तन्त इति पंचालैकदेशे पंचालशब्दः॥
ततः पूर्वशब्देन समानाधिकरणात् पूर्वापरप्रथमेत्यादिना कर्मधारयः। पूर्वयायातमिति। यायातमिति ३५
मधिकृत्य कृतो ग्रंथ इत्युत्पत्तिया यायातशब्दः सिद्धः। शब्दग्रहणमित्यादि। दिक्शिष्टः शब्द इति उत्तरपद

स्यापि समासस्तेन कालवाचिनोपि ग्रहणात् पूर्वयायातमित्यादावपि भवति। आचार्योपसर्जन। आ
चार्योपसर्जनग्रहणमंतेवासिनो विशेषणं सन्नम्प्यर्थे प्रथमा तदाह। आचार्योपसर्जनांतेवासिनीति।
आचार्य उपसर्जनं यस्य स आचार्योपसर्जनः स चासावंतेवासी चैतद्वाचिनि। पूर्वपाणिनीया इति। पूर्वा
परप्रथमेति समासः पाणिनेश्छात्राः पाणिनीयाः। अत्रांतेवासिनः प्रधानं आचार्यस्तूपसर्जनं। पूर्व
पाणिनीयं शास्त्रमिति। पूर्वं चिरंतनमित्यर्थः। उत्तरपदवृद्धौ। अत्र वृद्धावित्येतावतैव वृद्धिमदुत्तरप
दपरिग्रहे सिद्धे उत्तरपदग्रहणं तदधिकारो लक्ष्यते उत्तरपदे स्वरितत्वा
दधिकारप्रतिपत्तिरित्याशयेनाह। उत्तरपदस्येत्यादि। सर्वपांचालक इत्यादि। सुसर्वार्द्ध दिक्शब्देभ्यो
जनपदस्येति वदंतविधौ अवृद्धादपि बहुवचनविषयादिति वुञ्। सुसर्वार्द्धाज्जनपदस्य दिशोम
द्राणामित्युत्तरपदवृद्धिः। वृद्धिशब्देन पारद्विविहितानदृत्युत्तरपद इत्युच्यमानेपि न निर्वाह इत्या
ह। सर्वकारक इति। बहुव्रीहौ। संज्ञायामिति बहुव्रीहेर्विशेषणं न विश्वशब्दस्य। विश्वकर्मेति॥
विशेः कन् निताद्यायुदात्तो विश्वशब्दः। उदरा। एषूत्तरपदेषु बहुव्रीहौ संज्ञायां पूर्वपदमंतोदात्तं स्या
त्। अयमपि पूर्वपदप्रकृतिस्वरस्यापवादः। वृकशब्दः। प्राणिनां कुपूर्वमित्याद्युदात्तः। वृकस्येवोद

रमस्य वृकोदरः। हर्यश्व इति। हरतेः सर्वधातुभ्य इन्निती न्। आद्युदात्तो हरिशब्दः। हरिरश्वोऽस्य हर्यश्वः। य
णि कृते उदात्तस्वरितयोरिति स्वरितः। महेषुरिति। महच्छब्दोऽन्तोदात्तः। वर्त्तमाने पृषन्महदित्यत्र तथा
निपातनात्। तथा च पूर्वपदप्रकृतिस्वरेणैव सिद्धे सति लन्त्यार्थ आरंभ पक्षादलादनेनैवांतोदा
त्तत्वं। उदाहरणं तु सुवर्णपुंखेषुरिति ज्ञेयं। सुष्ठु वर्णो येषां ते सुवर्णाः। नञ्सुभ्यामित्यंतोदात्तत्वं। सु
वर्णाः पुंखा येषां ते इति बहुव्रीहौ पूर्वपदप्रकृतिस्वरेण मध्योदात्तत्वं पुनरिषुशब्देन बहुव्रीहौ पूर्वपदमंतो
दात्तं भवति। एकादेशस्तु स्वरितो वानुदात्ते पदादाविति पक्षे स्वरितः। घटोदर इत्यादि। घटशब्दः पचाद्य
जंतः। कटुशब्दात् संज्ञायां कन्। चरिचलिपतिवदीनां वा द्वित्वमच्याक् चाभ्यासस्येति पचाद्यजंतश्चलाच
लशब्दः। अनुदर इत्यादि। अस्यावकाशः घटोदरः। नञ्सुभ्यामित्यस्यावकाशः। अपयशाः। सुय
शाः। एवं स्थिते विप्रतिषेधः। नदी। बंधुनीति शब्दस्वरूपापेक्षया नपुंसकनिर्देशः। गार्गीबंधुरिति। ग
र्गादिभ्यो यञिति यञंतात् गर्गशब्दाद्यञश्चेति ङीप्। गर्गाणि स्वरेणाद्युदात्तः। ब्रह्मबंधुरिति। बृंहेर्नोच्चे
ति नकारस्याकारादेशो मनिन् प्रत्ययश्चेति मन्निनंतो ब्रह्मशब्दो नित्स्वरेणाद्युदात्तस्तदाह। ब्रह्मे ३६
त्यादि। गार्गीप्रिय इति। अत्र पूर्वपदप्रकृतिस्वर एव। निष्ठोपसर्ग। उपसर्गपूर्वं निष्ठांतं पूर्वपदमंतोदा

त्तं। प्रधौतपाद इति। धावु गतिशुद्ध्योः। छ्वोः शूडनुनासिके च। ऊठ्। एत्येधत्यूठ्स्विति वृद्धिः। प्रधौतशब्दो गति
स्वरेणाद्युदात्तः। प्रसेवकमुख इति। ष्वुलंतः प्रसेवकशब्दः कृदुत्तरपदप्रकृतिस्वरेण लित्स्वरेणा
न्मध्योदात्तः। शुष्कमुख इति। शुष्क धृष्टाविति शुष्कशब्द आद्युदात्तः। उत्तरपदादिः। उत्तरपदेति
पृथक्पदं लुप्तषष्ठीकं। कर्ण आद्युदात्त इति। सिद्धार्थकथनमेतत्। उत्तरपदस्य कर्णशब्दस्यादिरुदात्त
इत्यक्षरार्थः। एवं चास्मिन्प्रकरणे कर्ण इत्यादौ षष्ठ्यर्थे प्रथमेति ज्ञेयं। शंकुकर्ण इति। शंकुः कर्णोयस्येति विग्र
हः। सप्तमीविशेषणे इति सप्तम्यंतस्य पूर्वनिपाते प्राप्ते गड्वादेः परा सप्तमीति परनिपातः। कर्णे लक्षण सप्तमी।
स्येति दीर्घः। पशूनां विभागज्ञानार्थं शंकुप्रतिरूपकं कर्णादिषु यच्चिह्नं क्रियते तदिह लक्षणं गृह्यते।
पृथक् वर्णग्रहणात्। अन्यथा वर्णेनापि लक्ष्यमाणत्वादनर्थकं तत्स्यात्। श्वेतपाद इति। श्विता वर्णे
पचाद्यच्। शोनलकर्ण इति। शुनशो नार्थे। अनुदात्तेतश्च हलादेरिति युच्। प्रत्युदाहरणे सर्वत्र पूर्व
पदस्वर एव भवति। संज्ञौपम्य। संज्ञायामौपम्ये च यो बहुव्रीहिस्तत्र कर्णशब्द उत्तरपदमाद्युदात्तं स्यात्।
कंठपृष्ठ। कंठादीनां समाहारद्वंद्वेन नपुंसकत्वं। कंठादीन्युत्तरपदानि संज्ञौपम्ययोराद्युदात्ता
नि स्युर्बहुव्रीहौ। कंठपृष्ठे स्वांगशिरामित्याद्युदात्ते। ग्रीवाजंघयोः स्वांगत्वेप्यदंतत्वानावृदंतोदा

ङो४

त्तत्वं।सुग्रीवइत्यत्र परत्वान्नञ्सुभ्यामित्यंतोदात्तत्वेन भाव्यं।अस्य तु दशग्रीवादिरवकाशः।यदि तु ने
